
ALL INDIA AYURVEDIC CONGRESS



॥ श्रीः ॥

विद्याभवन आयुर्वेद ग्रन्थमाला

७२

माधव-द्रव्यगुणः

(भावस्वभाववादः)

सम्पादकः

डा० प्रियव्रतशर्मा

एम. ए., ए. एम. एस., साहित्याचार्य

काशीहिन्दूविश्वविद्यालयीय-चिकित्साविज्ञानसंकाये

द्रव्यगुण-विभागाध्यक्षः



चौखम्भा विद्याभवन, वाराणसी १

१९७३

प्रकाशक : चौखम्बा विद्याभवन, वाराणसी
मुद्रक : विद्याविलास प्रेस, वाराणसी
संस्करण : प्रथम, वि० सं० २०३०
मूल्य : १२-००

चौक, पो० बा० ६६, वाराणसी-१
फोन : ६३०७६

प्रधान कार्यालय
चौखम्बा संस्कृत सीरीज आफिस
गोपाल मन्दिर लेन,
पो० आ० चौखम्बा, पोस्ट बाक्स ८, वाराणसी-१
फोन : ६३१४५

THE
VIDYABHAWAN AYURVEDA GRANTHAMALA
72

THE

MĀDHAVA-DRAVYAGUṆAḤ

(BHĀVASWABHĀVAVĀDAḤ)

Edited by
DR. P. V. SHARMA,
M. A. (Double), A. M. S., Sahityacharya

Senior Professor and Head of the Department of Dravyaguṇa, Faculty of Medical Sciences, Banaras Hindu University, Varanasi (India)

THE
CHOWKHAMBA VIDYABHAWAN
VARANASI-1 (India)
1973

© The Chowkhamba Vidyabhawan
Post Box No. 69
Chowk, Varanasi-1 (India)
1973
Phone : 63076

First Edition
1973
Price Rs. 12-00

Also can be had of
THE CHOWKHAMBA SANSKRIT SERIES OFFICE
Publishers and Oriental Book-Sellers
P. O. Chowkhamba, Post Box 8, Varanasi-1 (India)
Phone : 63145

INTRODUCTION

Paryāyaratnamālā is known as one of the works on Indian Materia Medica by Mādhava, son of Indu Kara or Indra Kara. Scholars have identified him as the same person who composed the Rugviniścaya, commonly known as Mādhava-Nidāna, a popular work on diagnosis of diseases.[1] This was made a basis for description of diseases with their treatment in serial order by later writers on Medicine like Vṛnda[2] and his follower Cakrapāṇidatta. But apart from this, a work known as Dravyaguna of Mādhava has been quoted in some commentaries which shows that there was another independent work on Indian Materia Medica by Mādhava. This made this author inquisitive to find out the Manuscript. Inspite of having hunted various catalogues, I could not be able to locate any such manuscript. Aufrecht has given only the following information about this work :—

> "Mādhava—son of Cakradatta, grandson of Srikantha datta, father of Purusottama (Dravyaguna Med.)"
>
> —Cat. Cat. Part II, page 103.

This information is too meagre to enable any worker to proceed further. Fortunately when descriptive catalogue of Samskrit Mss. located in different libraries of the Banaras Hindu University[3] was brought out recently it opened a new door for this work. It has recorded a manuscript of Mādhava's Dravyaguna (Sl. No. 5895; Accn. No. B3773) located in the Bharatendu collections of the Bharat Kala Bhavan of this University.

NATURE OF THE MANUSCRIPT

Size—27. 5 × 9. 8   Condition—Medium
Folios—71
Script—Devanagari

---

1. Tarapada Chowdhury : Paryayaratnamala, Introduction, page 1.
2. Vṛnda : Siddhayoga, 1–2.
3. Ramasankar Tripāthi, 1971.

In introductory portion there are six verses. [1] Thereafter description of drugs starts with Śivā (Haritaki).

The last verse contains the name of the author without any other information about him. [2]

In colophon there is only 'इति श्रीद्रव्यगुणः समाप्तः' Then there are the following sentences :—

संवत् १५०९ समये कार्त्तिक वदी जयन्तीवासरे श्रीसोनारीग्रामे श्री वेणीशर्मसुतसन्मिश्रमहादेवेन पठितम् । तत्सबंधेनालेखि । शुभः ।

ORTHOGRAPHICAL PECULIARITIES

1. Va has been used for Ba such as Valā for Balā.
2. Śa has been used for Sa and vice-verse such as Kāśa for Kāsa and Saivāla for Śaivāla.
3. Kha for ṣa and vice-verse such as Kalukhā for Kaluṣa and Ṣaga for Khaga.
4. Ya for Ja such as Yuṣṭa for Juṣṭa.
5. Na for Ṇa and vice-versa such as Karāni for Karāṇi and Rasāyaṇi for Rasāyani.
6. After R double consonants are used such as Marddaka for Mardaka.

Transcriber has also given local names for some substances such as वउरि for धाना, होरहा for उलुंब, डनडौआ for श्योनाक. These terms are popular in the Varanasi region. It is possi-

---

1. क्लेशाद्यैरपरामृष्टमूर्ति जगत्पतिम् ।
विभुमव्ययमीशानं प्रणम्य शशिभूषणम् ॥
रसवीर्यविपाकाद्यैः सिद्धः सद्वैद्यूपजितः ।
भावस्वभाववादोऽयमार्षः संह्रियते मया ॥
भैषज्याहारचेष्टानां यो न वेत्ति गुणागुणम् ।
न स वेत्ति भिषक् सम्यक् स्वस्वायुष्यहिताहितम् ॥
अतः समस्तवस्तूनां गुणदोषविनिश्चयः ।
ज्ञातव्यो यत्नतः सद्भिर्वैद्यैः जनहितार्थिभिः ॥
संक्षिप्तं ग्रन्थमिच्छन्ति भिषजो विस्तरद्विषः ।
संक्षिप्तोऽयमतः सूक्तः सुप्रयुक्तो विरच्यते ॥
वृद्धिं तुल्यगुणैर्भावैः विपरीतगुणैः क्षयम् ।
युक्तैर्यान्तीति संक्षेपः सर्वदा सर्वधातवः ॥
2. आकृष्य सर्वशास्त्राण्युपयुक्तसमस्तवस्तुगुणदोषः ।
माधवकविना रचितः सुखहेतोः सर्वसत्वानाम् ॥

ble that the transcriber belonged to this area. The Orthographical peculiarities are also common in this region.

When this work went in the press quite ahead, I came to learn that the Ayurveda Saukhya or Toḍarānanda contained the same verses. [1] After some time, while hunting the unpublished catalogues in the Saraswati Bhavan library of Varanasi I came across another manuscript of the work. It's description is as follows :—

No. 1/143—85627
Folio—1-72
Size—9.4 × 3.2
Lines per folio—6
Letters per line—30
Script—Deva Nāgari,

The colophon of this manuscript reads as follows :—

"इति श्रीमाधवाभिधानं द्रव्यगुणं समाप्तम् ।"

before this there are two important verses indicating the name of the author and sources of the work :—

सुश्रुतचरकपराशरवाग्भटहरिचन्द्रभेडवैदेहैः ।
हारीताद्यैरपरैरुक्तं यद् यन् महामुनिभिः ॥
आकृष्य सर्वशास्त्राण्युपयुक्तसमस्तवस्तुगुणदोषः ।
माधवकविना रचितः सुखहेतोः समस्तसत्वानाम् ॥

As regards the Todaranand or Ayurvedasaukhya [2] the entire matter of Madhava's Dravyguna is contained verbatim in 8th Chapter (Aṣṭama Harṣa) from folios 74 to 103. This chapter ends as :—

"सुश्रुतचरकपराशरवाग्भटहरिचन्द्रभोजवैदेहैः ।
हारीताद्यैराद्यैरप्युक्तं यन्महामुनिभिः ॥
आकृष्य सर्वशास्त्राण्युपयुक्तसमस्तवस्तुगुणदोषान् ।"

---

1. This information was given by Pt. Hari Datta Shastri of Delhi for which the editor is thankful to him.

2. The Ms. was made available to me by Dr. Bhagawan Dash, Dy. Director, C. C. R. I. M. & H., New Delhi for which the editor is thankful to him. He further informed that the Ms. was from the collections of late Pt. Ram Prasad Sharma, Rajavaidya of Patiala.

Thus the author has clearly dropped out the other line of the last verse containing the name of the author (माधवकविना रचितःसुखहेतोः सर्वसत्वानाम्) perhaps with the intention of taking the authorship of the work himself.

All the three Mss. have been utilised in editing. They have been numbered as follows :—

Ms. 1—Ms. from Banaras Hindu University.

Ms. 2—Ms. from Saraswati Bhavan, Varanasi.

Ms. 3—Extracts from the Ms. of Todaranand or Ayurvedasaukhya from Patiala.

Among them the Ms. 2 is the best one having less mistakes and better script.

As the Mss. 2 and 3 came to notice when the printing was quite ahead, they were utilised in the latter portion of the text. The textual variants in the earlier portion could not be included alongwith the text and as such have been given in Appendix I.

CONTENTS AND THE PLAN OF THE WORK

The work is divided into the following Vargas :—

	Number of Verses
1. Vividhauṣadhi Varga	117
2. Lavaṇa Varga	13
3. Ikśu Varga	21
4. Madhu Varga	15
5. Kśīra Varga	24
6. Dadhi Varga	20
7. Takra Varga	19
8. Navanīta Varga	3
9. Ghṛta Varga	13
10. Taila Varga	23
11. Sneha Varga	4
12. Madya Varga	31
13. Kāñjika Varga	11
14. Mūtra Varga	12
15. Toya Varga	55
16. Śāli Varga	11

17. Kudhānya Varga	7
18. Śimbi Dhānya Varga	19
19. Māmsa Varga	40
20. Matsya Varga	15
21. Phala Varga	67
22. Śāka Varga	86
23. Śreṣṭha Varga	8
24. Rasa Varga	6
25. Maṇḍa Varga	11
26. Anna Varga	13
27. Pāna-Bhakśya Varga	76
28. Anupāna Vidhi	24
29. Prakīrṇa Varga (Swastha Vṛtta)	102
Total :	866

There is some difference in relation to number of verses in the Mss. some additional verses are found to have been inserted on margins about which it is difficult to decide whether they are part of the text. In such cases, some important verses have been given in footnote while generally following the Ms. 1.

In this way the classification and arrangement of the subject matter in Madhava's Dravyaguna is much more exhaustive than in any other Nighantu. For this, he seems to have followed closely the Susruta Samhita. Susruta has divided the subject matter into two broad heads—(1) Drava Dravya (Liquids or Drinks) and (2) Annapāna vidhi (food). Mādhava has not used these words but practically adopted the same arrangement except that he added in the beginning a chapter on medicinal substances (Vividhauṣadhi Varga) on the line of Vāgbhaṭa. Lavana Varga has got the second place in Mādhava's work alongwith Drava Dravyas while in Susruta it is in the Chapter of Anna-pāna. Some categories have been expanded by Mādhava making a separate chapter. Such as he has given a separate chapter as 'Sneha Varga' apart from the chapters on Ghṛta and Taila. Similarly, Kānjika Varga and Matsya Varga have been described in addition to Madya Varga and Māmsa Varga res-

pectively. The topic of food preparations has been divided into three chapters by Mādhava as Maṇḍa Varga, Anna Varga and Pāna-Bhakśya Varga. Some new chapters as Rasa Varga and Śreṣṭha Varga have been added.

Most of the verses in this respect are the same in both the works.

In arrangement of drugs in certain Gaṇas (groups) Susruta had their common therapeutic effect in view. Similarly, Mādhava also seems to have some common action of drugs in view and has made it one of the bases of the arrangement of drugs. For this he had to make repetition of the matter in different contexts in some cases. He has started the first chapter (dealing with drugs) with Haritaki and as this is 'Sara' (Purgative) in action. He has described other drugs like Trivṛta, Rājavṛkṣa, Katukā, Trāyamānā, Yavāsa in continuation. Similarly, Pāthā, Kutaja, Indrayava, Hṛibera, Mustā, Ativiṣā and Bilwa have been described in continuation. All these drugs have Grāhi (Astringent) action. Other groups in view were Virecana, Dipana, Rocana, Śothahara, Vātahara, Vṛṣya, Śoṇitasthāpana, Medhya and Kuṣṭhaghna. Gandha Dravyas have been dealt with at one place subdividing them into Pittaghna, Vātaghna and Kaphaghna such as Candana, Kumkuma and Karpūra respectively. Drugs efficacious in Mukharoga, Kāsa-śwāsa and Jwara have been described in the end. After the Vegetable drugs, minerals and animal products have been described. In these groups also there is some order in relation to action. For instance, Suvarna Gairika, Tuttha, Anjana etc. have been said as Cakśuṣya and are described in continuation. The chapter ends with description of flowers. In Phala Varga and Śāka Varga also there seems to be some order of Arrangement of drugs. Although the author has nowhere mentioned this fact explicitly it is evident by close observation.

Apart from Susruta, the author has closely followed the Aṣṭānga Samgraha of Vāgbhata I. Begining with the Vividhausadhi Varga and ending with Āsyā, Jyotsnā, Vāyu etc. the work is based on the pattern of Vāgbhaṭa the other details and gaps having been filled up with the help of other works.

Some verses of the Aṣṭānga Samgraha are found verbatim. Similarly some verses from the Caraka Samhita are also borrowed by the author.

Among his sources, the author mentions Caraka, Suśruta, Parāśara, Vāgbhaṭa, Haricandra, Bheḍa, Vaideha, Hārita etc. Hence he must have utilised all these works available to him at that time. The Kharanāda Samhitā is said to be a work of Haricanda. Perhaps the author made use of this work too.

Apart from the ancient sources, the author has borrowed copiously from the Nighantus of Medieval period particularly the Soḍhala Nighantu. As we shall see, several passages are the same in both the works. Short and practical description of drugs given by Sodhala might have attracted the author. It may also be possible that Sodhala might have followed Mādhava because the description of Sodhala is more developed and a large number of drugs like Kankuṣṭha etc. described by Sodhala are not found in Mādhava's work. Like Cakrapāni he has given prominence to dietitic substances and has condensed the material regarding drugs in one chapter.

METHOD OF EDITING

In editing the following steps have been taken :—

1. Looking to the orthographical peculiarities, the words have been placed in correct form.
2. Grammatical mistakes here and there have been removed.
3. The text has been corrected on the basis of original sources like Suśruta, Cakrapāni and Soḍhala.
4. Attempt has been made to avoid repetition or duplication and in such cases duplicate passages have been given in brackets.

AUTHOR AND HIS DATE

As the last verse of the work indicates, it is composed by Mādhava Kavi. [1] After this there is a sentence which shows

---

1. आकृष्य सर्वशास्त्राण्युपयुक्तसमस्तवस्तुगुणदोषः ।
माधवकविना रचितः सुखहेतोः सर्वसत्वानाम् ॥

that the work is read by Mahadeva Mishra in the year 1509 (Samvat) which comes to 1452 A. D. Perhaps this is about the transcription of the work. There is no any other information in the Ms. about the author.

As regards the date of the work, if we take the year 1452 A. D. as the date of transcription of the work, the work must be anterior to this. The work has been quoted by Swāmi Lakśmī Ram (20th Cent. A. D.) in his notes on Siddha Bheṣaja Maṇimālā of Śri Kṛṣṇa Rāma Bhaṭṭa. [1] Śivadatta Miśra (17th Cent. A. D.) has quoted the work copiously in his commentary on Śiva Kośa which shows the popularity of the work at that time. [2] His son, Kṛṣṇadatta has also quoted the work in his commentary on Trimalla Bhatta's Dravyaguṇa-Śataśloki. [3] Todaranand or Ayurvedasaukhya, which is said to be a work of Todaramalla, one of the ministers of Akbar (16th Cent. A. D.) has included the work in toto in his compendium which shows the popularity of the work at that time.

Āḍhamalla belonging to 15th or 16th Cent. A. D. has quoted a portion of the verse from Madhava's work though

---

1. यदाह माधवः—पटोलपत्रं पित्तघ्नं वल्ली चास्य कफापहा ।
फलं त्रिदोषशमनं मूलं तस्य विरेचनम् ॥ 2–2

"पित्तकर्तृत्वं चास्य (वार्त्ताकस्य) जीर्णविषयं, तेनं हृद्यं रुच्यमपित्तलम् इति माधवोक्तं बालविषयं न विरुध्यते, तथाहि—सा बाला कफपित्तघ्नी पक्वा सक्षारपित्तला इति ॥ 2–23' .

2. Pages 73, 78, 83, 97, 105, 110, 114, 147, 149. Bhānuji Dikśita (17th Cent. A. D.) has also quoted Madhava in his commentary on Amarakośa at Severāl places but they all are from the Paryayaratnamala of Madhava and not from Madhava's Dravyaguna. Similarly Sarvānanda Vandyaghaṭiya (12th Cent. A. D.) in his commentary on Amarakośa has also meant the same work by 'Madhava' (II 81, 91), III–239, 245 and 282.

3. यदाह माधवकारः—'तद्बालं कफपित्तघ्नं पक्वं सक्षारपित्तलम् ।
उक्तं च—पटोलपत्रं पित्तघ्नं वल्ली तस्य कफापहा ।
फलं त्रिदोषशमनं मूलं चास्य विरेचनम् ॥
माधवकरोऽपि—सुगंधिः कटुको हृद्यः कक्कोलः कफवातजित् ।

without mentioning its name.[1] The work has been quoted by Sivadāsa Sena[2] (15 Cent. A. D.). The first author to quote him is Bopadeva (13-14 Cent. A. D.) in his commentary on Siddhamantra.[3]

When we proceed towards the upper limit, the work is also said to be quoted by Niścala Kara,[4] one of the disciples of Vijaya Rakśita. The date of Vijaya Rakśita has been fixed by Dr. Hornle as 1240 A. D. which has been refuted by D. C. Bhattacharya. In the latter's opinion, Niscala Kara wrote his commentary on Cakradatta in 1110-20 A. D., during the reign of Rāmapāla. Srikanthadatta, a copupil of Niscala Kara, has not mentioned this Madhava's work. Moreover, the Mss. of Niscala Kara's commentary located at Bhandarkar Oriental Research Institute do not contain this passage. Hence this casts doubt about the authenticity of the quotation found in only one of thet hree Mss. of Niscala Kara's commentary. Dallana (12th Cent. A. D.) and Cakrapani (11th Cent. A. D.) do not mention this work in their commentaries. But Sarvananda (12th Cent. A. D.) in his commentary on Amarakośa has quoted a portion of a verse (वार्ताकुरेषा गुणसप्तयुक्ता इति वैद्यके स्त्रियां वार्त्ताकुः वनौषधिवर्गं, श्लो० ११४) which

---

1. पटोलमत्र पटोलपंचांगं, केवलं पटोलनालं वा,
यतः 'नालं तस्य कफापहम्' इति वचनात्। Śārngadhara—2. 2. 19. Also see 2. 2. 172; 3. 8. 58.

The verse about Patola (पटोलपत्रं पित्तघ्नं etc.) of Madhava was quite popular and has been quoted by several generations of commentators right upto the present Century. Bhāvamishra (16th Cent. A. D.) also could not resist his temptation to include this verse in his famous compendium.

2. यत्तु द्रव्यगुणे माधवकरेण पेयाविलेपीगुणं पठित्वा लिखितम् Cakradatta 1-31
एतदेवोक्तं माधवेनापि-स्वाद्वादीनां स्वादुपाकः-तिक्ततूवरौ इति।
Dravyaguna-Samgraha 1-10.

3. माधवकरोऽपि—पटोलपत्रं पित्तघ्नं वह्नी तस्य कफापहा।
फलं त्रिदोषशमन मूलं चास्य विरेचनम् ॥ श्लो० ५

4. D. C. Bhattacharya : New Light on Vaidyaka Literature, Indian Historical quarterly, Vol. XXIII, No. 1, (March, 1947). pages 123-155.

is found in Madhava's Dravyaguna. There are several passages common in Cakrapāni's Dravyaguna Samgraha and Madhava's Dravyaguna.[1] Sivadāsa Sen quotes the author of Dravyaguna as Mādhava Kara which identifies him as the author of Rugviniscaya who flourished in 7th Cent. A. D. Because it was translated into Arabic in 8th Cent. A. D. and is followed by Vṛnda (9th Cent. A. D.).[2]

As regards the internal evidences, the following points are to be noted :—

1. There is description of Jayapāla which is a drug of medaeval source in India.

2. Vijayā has been described which is also a drug described in Medaeval texts.

3. Opium has also been described which is found in Dhanwantari Nighantu (10-13th Cent. A. D.) and onwards.

4. There is no mention of Yaśada which is found in the texts after 14th Cent. A. D.

5. There is Sulemāni Kharjura which is found in Madanpāla and Bhāva Prakāsa Nighantu in later medaeval period.

The points 4 and 5 indicate the existence of this work before Madanpāla (14th Cent. A. D.) who has described the medaeval drugs and seems to have borrowed sulemāni Kharjūra and other descriptions from Madhava. A large number of verses in Madhava's work tally with those of Sodhala Nighantu[3] and Dravyaguna Samgraha of Cakrapāṇi datta.

---

1. For instance, see verses 1 to 7 in Dhanya Varga of Madhava's Dravyaguna and verses 12 to 20 of Dravyaguna Samgraha of Cakrapāni.

2. D. C. Bhattacharya : Op. cit. He places Mādhava after Jejjata in 900–925 A. D.

3. For instance, the following and other verses are exactly the same in Sodhala Nighantu and Madhava's Dravyaguna :—

(१) यासः सरो ज्वरच्छर्दिश्लेष्मपित्तविसर्पनुत् ।

(२) खदिरः कुष्ठवीसर्पमेहपित्तकफान्तकः ।

(३) निम्बः पित्तकफच्छर्दिव्रणहृल्लासकुष्ठनुत् ।

(४) पर्पटः पित्ततृड्दाहज्वरजित् श्लेष्मशोषणः ।

(५) पाठातीसारशूलघ्नी कफपित्तज्वरापहा ।

SUMMING UP

1. Mādhava's Dravyaguna has been quoted by Swāmī Lakśmī Rām (20th Cent. A. D.), Śivādatta and his son (17th Cent. A. D.), Toḍarānand (16th Cent. A. D.), Śivadāsa Sen (15th Cent. A. D.) and Bopadeva (13th–14th Cent. A. D.).
2. Some drugs of medaeval source such as Opium, Bhangā, Jayapāla and Sulemāni Kharjūra have been described.
3. There is no Yaśada mentioned in the text.
4. A large number of verses tally with those in Chakrapāni's Dravyaguna Samgraha and Sodhala Nighantu.

Śivadāsa Sen has once mentioned Mādhava Kara but it is not possible because of the evidences which point towards the medaeval period while Mādhava Kara belonged to the ancient period (7th Cent. A. D.). Even if we accept the date of Mādhava (900–925 A. D.) proposed by Dr. C. Bhattacharya it does not solve the problem because even in that period opium was not introduced in Indian Medical texts. He also does not seem to be the author of Paryāyaratnamālā because the self-introduction given by the author about parentage and place in this work does not fit in the author of Dravyaguna who has introduced himself only as Kavi. [1]

Perhaps the author of Mādhava Cikitsita is also different because though there is no any information about the life of the author in the text, in the colophon he is said as the son of Candra Kara. He is also quoted by Śrīkanṭhadatta who does not refer to the author of Dravyaguna anywhere. Aufrecht mentions Mādhava, the author of Dravyaguna, as son of Cakradatta, grandson of Śrīkanṭhadatta and father of Puruśottama. There is a Ms. of Dravyaguna (No. 3165) in Jammu-Kashmir Library whose author is Puruśottama, son of Mādhava and grandson of Cakradatta. This confirms the above statement of Aufrecht. Śrīkanṭhadatta, as he was a disciple of Vijaya Rakśita, belongs to 13th Cent. A. D. and

1. Aufrecht has mentioned about 60 different Mādhavas. Among them there is one Madhava Kavi, author of Padyāvali.

if we accept the Aufrecht's view, his grandson, Mādhava, will have to be placed in later 13th Cent. A. D.

The names of the author with the Surname 'Kara' mentioned by Śivadasa Sen has confused the issue and has created a doubt about his identity with the author of Rugviniścaya. Kṛṣṇadatta, in his commentary, has mentioned him once as Mādhava Kara and at the other place as Mādhava kāra. It seems probable that Mādhava's Dravyaguna was popular with the author's name and was commonly spoken as Mādhava and the author as Mādhava or Madhavakāra. Due to transcriptional error 'Kāra' might have become as 'Kara' in Śivadasa's Manuscript.

Cakrapāṇi has quoted some Nighantukāra in his commentary on Caraka on Pinyāka as Synonym of Harita Sigru.[1] There is Pinyākı in Sāka Varga of this work.[2] It may be that he might have meant our author. In this case, he stands before Cakrapāṇi and there would not be any objection to taking him as Mādhava Kara, the author of Nidana. But in that case, we have to presume that the matters of Medaeval sources were introduced in the text by some other writer later on which would be a farfetched explanation.

Moreover, there is another work known as 'Nighantu' and quoted by Savānand at several places and as such most probably Cakrapāṇi also meant this work.

As pointed out earlier, it may also be possible that Sodhala might have followed Mādhava because the subject matter is more developed in the former's work but any how due to presence of opium etc. it can't go before the 12th Cent. A. D. when these drugs were introduced in Indian Materia Medica. It may also be possible that both the authors derived their informations from common sources. In that case they would be contemporary.

As the date of transcription of the work is 1452 A. D. it must be anterior to it.

---

1. निघण्टुकारस्त्वाह-पिण्याकः हरितशिग्रुः । —Caraka, Su. 274.
2. पिण्याकी वातला सान्द्रा रुचिष्यानलदीपनी ॥

Looking to all these facts, the work in the present form seems to be of the medaeval period and its date may be fixed between Sodhala (12th Cent. A. D.) and Bopadeva (14th Cent. A. D.) 13th Cent. A. D. This is confirmed by the fact that the work has been commented upon by Meghadeva, son of Ravinābha, who has quoted Aruṇadatta and is thus placed in 14th. Cent. A. D. His work is known as Bhāvaswabhāva-Tippaṇi. [1]

On the basis of the title 'Kavi', if taken as abbreviated form of Kaviraj Madhava seems to belong to Bengal where vaidyas are known as Kavirajas. Thus the Aufrecht's view that the Authorship of this work goes to Mādhava, son of Cakradatta and grandson of Srikanthadatta is again confirmed, the geneology as given by Puruṣottama[2] in his work is as follows :—

Śrikanthadatta (Disciple of Vijaya Rakśita)
|
Cakradatta
|
Mādhava
|
Puruṣottama

ACKNOWLEDGEMENT

The author is grateful to the authorities of Bharat Kala Bhavan, Banaras Hindu University particularly Km. Devaki

---

1. No. 1332, Catalogue of Sanskrit Manuscripts, Vol. I. Bibliotheque National, Paris. Madhava's Dravyaguna is Differently named as Mādhavābhidhāna (Op. Cit. 1326) Or Bhāwaswabhāva (Vāda) as taken by its Commentator Meghadeva.

   Also see No. 142, A check-List of Sanskrit Medical Manuscripts in India (C. C. R. I. M. & H., New Delhi).

2. वृन्दस्य माधवकरस्य च संग्रहेषु व्याख्याकरः सकलजीवितवेदविज्ञः ।
श्रीकण्ठदत्त इति यः प्रथितः पृथिव्यां तेनानुरूपतनयोऽजनि चक्रदत्तः ॥
चक्रस्य पौत्रोऽपि च माधवस्य पुत्रो हरेर्या विमला प्रमृतिः ।
जगद्धितार्थं पुरुषोत्तमोऽसौ संक्षेपतो द्रव्यगुणं चकार ॥

Ahivasi, Assistant Curator for sincere co-operation in going through the manuscript. I am very much thankful to Dr. G. P. Sharma, one of my colleagues in the Department for preparing a transcript of the same. Thanks are also due to the authorities of the Saraswati Bhavan, Varanasi and bibliotheque nationale, paris for making the Ms. available.



सम्पादक–परिचयः

विहारगे पाटलिपुत्रमण्डले
खगोलपार्श्वस्थितमुस्तफापुरे ।
सुजन्म संप्राप्तमनेकपण्डितैः
यशस्विवैद्यैश्च विभूषिते कुले ॥ १ ॥

विप्रावतंसमगवंशविभूषणोऽसौ,
रामावतारतनयः सुजनैकबन्धुः ।
तातस्तु यस्य युगपद् भुवि राजते स्म,
भानुः प्रचण्डयशसा मनसौषधीशः ॥ २ ॥

श्रीसत्यनारायणशास्त्रिवर्यो
वैद्यश्च राजेश्वरदत्तशास्त्री ।
तयोः गुरूणां महतां तु गुर्वो-
र्गीर्भिर्गिरां गौरवमादधानः ॥ ३ ॥

साहित्यशास्त्ररसिको भिषजां वरेण्यः,
काश्यामधीतसकलोभयवैद्यविद्यः ।
अध्यापयन्नथ च शोधपथे प्रवृत्तः,
विद्यालये जगति हिन्दुपुरःसरेऽस्मिन् ॥ ४ ॥

क्रमेण कालोपहताः निघण्टवः,
तिरोगताः द्रव्यगुणाकरास्तथा ।
भृशं समुद्धर्तुमिहैष तान् मुदा,
प्रियं व्रतं धारयति प्रियव्रतः ॥ ५ ॥



॥ श्रीः ॥

माधव-द्रव्यगुणाः

१. विविधौषधिवर्गः

क्लेशाद्यैरपरामृष्टमष्टमूर्त्ति जगत्पतिम् ।
विभुमव्ययमीशानं प्रणम्य शशिभूषणम् ॥ १ ॥
रसवीर्यविपाकाद्यैः सिद्धः सद्वैद्यपूजितः ।
भावस्वभाववादोऽयमार्षः संह्रियते मया ॥ २ ॥
भैषज्याहारचेष्टानां यो न वेत्ति गुणागुणम् ।
न स वेत्ति भिषक् सम्यक् स्वस्वायुष्यहिताहितम् ॥ ३ ॥
अतः समस्तवस्तूनां गुणदोषविनिश्चयः ।
ज्ञातव्यो यत्नतः सद्भिर्वैद्यैः परहितार्थिभिः ॥ ४ ॥
संक्षिप्तं ग्रन्थमिच्छन्ति भिषजो विस्तरद्विषः ।
संक्षिप्तोऽयमतः सूक्तः सुप्रयुक्तो विरच्यते ॥ ५ ॥
वृद्धिं तुल्यगुणैर्भावैर्विपरीतगुणैः क्षयम् ।
युक्तैर्यान्तीति संक्षेपः सर्वदा सर्वधातवः ॥ ६ ॥
शिवा पंचरसायुष्या चक्षुष्या लवणा सरा ।
मेध्योष्णा दीपनी दोषशोथकुष्ठव्रणापहा ॥ ७ ॥
शिरोऽक्षिपाण्डुहृद्रोगकामलाग्रहणीगदान् ।
बिबन्धं स्रोतसां गुल्ममूरुस्तम्भमरोचकम् ॥ ८ ॥
हरीतकी हरेद् व्याधींस्तांस्तांश्च कफवातजान् ।
तद्वद्धात्री विशेषेण वृष्या शीता च वीर्यतः ॥ ९ ॥
भेदनं कटु रूक्षोष्णं वैस्वर्यक्रमिनाशनम् ।
चक्षुष्यं स्वादुपाक्यक्षं कषायं कफपित्तनुत् ॥ १० ॥
त्रिफला कफपित्तघ्नी मेहकुष्ठहरी सरा ।
चक्षुष्या दीपनी चैव विषमज्वरनाशिनी ॥ ११ ॥

कफपित्तहरा रूक्षा मधुरा मृदुरेचनी ।
वातकृत् कटुका पाके कषाया त्रिवृताऽरुणा ॥ १२ ॥
तस्मादल्पान्तरगुणा विज्ञेया त्रिवृता सिता ।
ज्वरहृद्रोगवातासृगुदावर्त्तोदिरोगिषु ॥ १३ ॥
राजवृक्षोऽधिकं पथ्यो मदुर्मधुरशीतलः ।
तत्फलं मधुरं बल्यं वातपित्तापहृत् सरम् ॥ १४ ॥
कटुकाह्वा सरा रूक्षा कफपित्तज्वरापहा ।
त्रायन्ती[1] कफपित्तास्रगुल्मज्वरहरी सरा ॥ १५ ॥
कफपित्तास्रनुच्छर्दिविषघ्नी तिक्तवल्कला ।
यासः[2] सरो ज्वरच्छर्दिश्लेष्मपित्तविसर्पनुत् ॥ १६ ॥
पिपासाकासपित्तास्रकफपाण्डुक्षयापहः ।
भूधात्री[3] वातकृत्तिक्ता कषाया मधुरा हिमा ॥ १७ ॥
खदिरः कुष्ठवीसर्पमेहपित्तकफापहः ।
भूनिम्बो[4] वातलो रूक्षः कफपित्तज्वरापहः ॥ १८ ॥
निम्बः पित्तकफच्छर्दिव्रणहृल्लासकुष्ठनुत् ।
तत्फलं भेदनं स्निग्धमुष्णं कुष्ठहरं सरम् ॥ १९ ॥
महानिम्बः[5] परं ग्राही कषायो रूक्षशीतलः ।
पर्पटः पित्ततृड्दाहज्वरजिच्छ्लेष्मशोषणः ॥ २० ॥
[6]पाठाऽतीसारशूलघ्नी कफपित्तज्वरापहा ।
कुटजः कफपित्तास्रत्वग्दोषार्शोऽतिसारजित् ॥ २१ ॥
तद्बीजं[7] रक्तपित्तातीसारज्वरहरं हिमम् ।
ह्रीबेरं[8] छर्दिहृल्लासतृष्णातीसारनाशनम् ॥ २२ ॥
कफघ्नं तिक्तकटुकं मुस्तं संग्राहि पाचनम् ।
दोषघ्नं पाचनं ग्राहि तिक्तं चातिविषाह्वयम् ॥ २३ ॥
संग्राहि कफवातघ्नं बिल्वं दीपनपाचनम् ।
बालं वृद्धं त्रिदोषाय दुर्जरं पूतिमारुतम् ॥ २४ ॥
कफवातामशूलघ्नी ग्राहिणी बिल्वपेशिका ।
कफानिलामदुर्नामब्रध्नशोथोदरापहम् ॥ २५ ॥
चित्रकोऽग्निसमः पाके शोथार्शःकृमिकुष्ठहा ।
सरं पुनर्नवायुग्ममुष्णवीर्यं रसायनम् ॥ २६ ॥

---

१. अविलचुकी २. जवासा ३. भूम्यामलकी, ४. चिराइता ५. बकाइनि
६. पाढ़ी ७. इन्द्रयव ८. गंधबाला ।

लोहितः[1] केशरागी च कृमिकुष्ठज्वरापहः ।
तद्वद् दन्ती[2] प्रभावात्तु विरेचयति सा नरम् ॥ २७ ॥
कफकृमिहरी तीक्ष्णा हस्तिदन्ती विरेचनी ।
जयपालो गुरुः स्निग्धो रेची पित्तकफापहः ॥ २८ ॥

स्नुही[3] साष्ठीलिकाध्मानगुल्मोदरहरी सरा ।
दूषीविषोदरप्लीहगुल्मकुष्ठप्रमेहिषु ॥ २९ ॥

बहुदोषे प्रयोक्तव्यमग्नितुल्यं सुधापयः ।
हेमाह्वा[4] रेचनी तिक्ता मदात्युक्लेशकारिणी ॥ ३० ॥

कृमिकण्डूकफानाहविषकुष्ठविनाशिनी ।
अर्कः कृमिहरस्तीक्ष्णः सरोऽर्शःकुष्ठनाशनः ॥ ३१ ॥

तत्पयः कृमिदोषघ्नं हितं कुष्ठोदरार्शसाम् ।
अरुष्करं[5] त्वग्निकरं कषायं कटुपाकि च ॥ ३२ ॥

उष्णं कृम्युदरानाहशोथदुर्नामनाशनम् ।
तन्मज्जा मधुरः पाके वृष्यश्चार्शोहरः परः ॥ ३३ ॥
गुग्गुलुः पिच्छिलः स्पर्शे विशदोऽभ्यवहारतः ।
सुस्वादुः सकटुस्तिक्तः सकषायो रसायनः ॥ ३४ ॥
व्रण्यः स्वर्यः कटुः पाके रूक्षः श्लक्ष्णोऽग्निदीपनः ।
क्लेदमेदोऽनिलश्लेष्मगण्डमेहापचीकृमीन् ॥ ३५ ॥

पिडकाग्रन्थिशोफांश्च हन्त्युष्णः स्रंसनो लघुः ।
स नवो बृंहणो वृष्यः पुराणस्त्वपकर्षणः ॥ ३६ ॥
पाके सक्षारमधुरो मध्ये मधुरपिच्छिलः ।
तीक्ष्णोष्णो लशुनः कन्दे कटुपाकरसः सरः ॥ ३७ ॥
हृद्यः केश्यो गुरुर्वृष्यः स्निग्धो दीपनरोचनः ।
भग्नसंधानकृद् बल्यो रक्तपित्तप्रदूषणः ॥ ३८ ॥

किलासगुल्मकुष्ठार्शोमेहकृमिकफानिलान् ।
सहिध्मापीनसश्वासकासान् हन्ति रसायनः ॥ ३९ ॥
[6]पलाण्डुर्मधुरो वृष्यः कटुः स्निग्धोऽनिलापहः ।
बल्यः पित्ताविरोधी च कफहृद्रोचनो गुरुः ॥ ४० ॥

स्निग्धो रुचिष्यः स्थिरधातुकारी
बल्योऽथ मेधारुचिपुष्टिदश्च ।

---

१. मंजीठ २. दातिनि, ३. सेहुंड, ४. चोक, ५. भेला, ६. पिआज ।

स्वादुर्गुरुः शोणितपित्तशस्तः
सपिच्छिलः क्षीरपलाण्डुरुक्तः ॥ ४१ ॥
तीक्ष्णो गृञ्जनको[1] ग्राही ग्रहण्यर्शोविकारनुत्[2] ।
शुष्कानि कफवातघ्नान्येतान्येषां फलानि तु ॥ ४२ ॥
कफानिलहरं स्वर्यं विबन्धानाहशूलजित् ।
कटूष्णं रोचनं वृष्यं हृद्यं चैवार्द्रकं स्मृतम् ॥ ४३ ॥
वातश्लेष्मविबन्धेषु रसस्तस्योपदिश्यते ।
गुडार्द्रकं वातहरं चक्षुष्यं पितनाशनम् ॥ ४४ ॥
क्षतघ्नं चैव वृष्यं च वर्चोभेदि कफापहम् ।
चक्षुष्यं रोचनं स्वर्यं विकासि विषदूषणम् ॥ ४५ ॥
स्तम्भाटोपानिलघ्नं च कर्शनं लवणार्द्रकम् ।
कुष्ठे पाण्ड्वामये कृच्छ्रे रक्तपित्ते ज्वरे व्रणे ॥ ४६ ॥
दाहे शरन्निदाघे च नैव पूजितमार्द्रकम् ।
गंडीरजलपिप्पल्यौ तुबुरुः श्रृंगवेरिका ॥ ४७ ॥
तीक्ष्णोष्णकटुरूक्षाणि कफवातहराणि च ।
आर्द्रिका तिक्तमधुरा मूत्रला रक्तपित्तकृत् ॥ ४८ ॥
नागरं कफवातघ्नं विपाके मधुरं कटु ।
वृष्योष्णं रोचनं हृद्यं सस्नेहं लघु दीपनम् ॥ ४९ ॥
स्निग्धोष्णा मधुरा वृष्या कटुका दीपनी सरा ।
पिप्पली मारुतश्लेष्मकासश्वासान् विनाशयेत् ॥ ५० ॥
श्लेष्मला स्वादुशीतार्द्रा गुर्वी स्निग्धा च पिप्पली ।
सा शुष्का विपरीता तु स्निग्धा वृष्या रसे कटुः ॥ ५१ ॥
स्वादुपाकाऽनिलश्लेष्मश्वासकासापहा सरा ।
भेदनं पिप्पलीमूलं दीपनं कृमिनाशनम् ॥ ५२ ॥
पित्तप्रकोपि तीक्ष्णोष्णं रूक्षं रोचनदीपनम् ।
रसे पाके च कटुकं कफघ्नं मरिचं लघु ॥ ५३ ॥
चविकागजपिप्पल्यौ पिप्पलीमूलवत् स्मृते ।
बद्धविट्स्यन्दिनी ज्ञेया विशेषाद् गजपिप्पली ॥ ५४ ॥

---

१. कबाबचीनी

२. गृञ्जनः गुग्गुलू इति मध्यदेशे तस्य लक्षणं:--रक्तमूलकसंकाशः कन्दो गृञ्जन उच्यते। महाकन्दो रसोन इत्यन्ये; गृञ्जनो दीर्घपत्र इति धन्वन्तरिः; सूक्ष्मपत्रो गृञ्जनो लोके कन्दूरीति जेज्जटः ।

त्र्यूषणं कफमेदोघ्नं मेहकुष्ठत्वगामयान् ।
निहन्याद्दीपनं गुल्मपीनसाग्न्यल्पतामपि ॥ ५५ ॥
पिप्पलीपिप्पलीमूलचव्यचित्रकनागरैः ।
पंचकोलमिति ख्यातं रूक्षं दीपनपाचनम् ॥ ५६ ॥
पंचकोलं कफानाहगुल्मशूलारुचीर्जयेत् ।
मरिचेन युतं तत्तु [1]षडूषणमुदीरितम् ॥ ५७ ॥
लघूष्णं पाचनं हिंगु दीपनं कफवातनुत् ।
स्निग्धं तीक्ष्णं कटुरसं शूलाजीर्णविबन्धनुत् ॥ ५८ ॥
तीक्ष्णोष्णं कटुकं पाके रुच्यं पित्ताग्निवर्धनम् ।
बहुश्लेष्मानिलहरं गन्धाढ्यं जीरकद्वयम् ॥ ५९ ॥
कारवी श्लेष्मवातघ्नी तद्वच्चैवोपकुंचिका[2] ।
बाष्पिका[3] कटुतीक्ष्णोष्णा कृमिश्लेष्महरी सरा ॥ ६० ॥
तद्वच्च राजिका रुच्या दीप्यकः[4] कोष्ठशूलनुत् ।
पुंस्त्वघ्नः कटुतीक्ष्णोष्णो भूस्तृणो वक्त्रशोधनः ॥ ६१ ॥
खराह्वा[5] कफवातघ्नी बस्तिरोगरुजापहा ।
कषायतिक्तमधुरं हृद्यं रोचनदीपनम् ॥ ६२ ॥
धान्यकं कासतृट्छर्दिशमनं चक्षुषोर्हितम् ।
भंगा[6] कफहरी तीक्ष्णा ग्राहिणी दीपनी लघुः ॥ ६३ ॥
तीक्ष्णोष्णा पित्तला मोहमदकृद् वह्निवर्धनी ।
जंबीरः[7] पाचनस्तीक्ष्णः कृमिवातकफापहः ॥ ६४ ॥
सुरभिर्दीपनो रुच्यो मुखवैशद्यकारकः ।
पार्श्वशूलारुचिश्वासकासहिक्कानिलापहः ॥ ६५ ॥
सुरसः[8] पित्तकृद्वातकृमिदौर्गन्ध्यनाशनः ।
शोथविद्रधिगंडघ्नी कृष्णगंधा[9] कफापहा ॥ ६६ ॥
मधुशिग्रुः सरस्तिक्तः शोथघ्नो दीपनः कटुः ।
उष्णोऽश्मरीहरो भेदी वरुणोऽनिलशूलनुत् ॥ ६७ ॥
[10]पारिभद्रोऽनिलश्लेष्मशोथमेहकृमीन् जयेत् ।
बिल्वमूलं मरुच्छ्लेष्मछर्दिघ्नं न च पित्तकृत् ॥ ६८ ॥
पाटला[11] कफवातघ्नी कट्वङ्गं[12] ग्राहि दीपनम् ।

---

१. षट्कटु, २. मंगरेला, ३. हिंगुपत्री. ४. जवाइनि, ५. अजमोद, ६. विजया, ७. मरुआ, ८. तुम्बुरु, ९. कटुशिग्रु, सहिजन, १०. पारिभद्रो निम्बतरौ – ओषः ४, ११. पाडर, १२. सोयन, उनडौआ ।

कषायं मधुरं तिक्तं काश्मर्यं च कफापहम् ॥ ६९ ॥
शोथनुद्वह्निमन्थश्च हितो वातविकारिणाम्[1] ।
एरण्डमूलं शूलघ्नं वृष्यं वातहरं परम् ॥ ७० ॥
वृष्यस्त्रिकंटको बल्यो वातघ्नो मूत्रकृच्छ्रजित् ।
उष्णा वातकफश्वासकासघ्नी कंटकारिका ॥ ७१ ॥
पाचनी ग्राहिणी सोष्णा वातघ्नी बृहती तथा ।
पृश्निपर्णी स्थिरा चैव पित्तश्लेष्मातिसारिणाम् ॥ ७२ ॥
पानभोजनसंस्कारे शस्यते वातभूयसाम् ।
वातपित्तापहं ग्राहि वृष्यं बल्यं बलात्रयम् ॥ ७३ ॥
स्निग्धं मधुरमायुष्यं महती मूत्रकृच्छ्रजित् ।
क्षतक्षीणहिता वृष्या बल्या नागबलाधिका ॥ ७४ ॥
बल्याश्वगन्धा वातघ्नी कासश्वासक्षये हिता ।
श्वासकासहरी स्वर्या जीवन्ती क्षयनाशिनी ॥ ७५ ॥
माषपर्णी महावृष्या चक्षुष्या मुद्गपर्णिका ।
ऋद्धिर्बल्या त्रिदोषघ्नी शुक्ला च मधुरा गुरुः ॥ ७६ ॥
वृद्धिर्गर्भप्रदा शीता वृष्या कासक्षयापहा ।
काकोलीयुगलं शीतं शुक्रं च मधुरं गुरु ॥ ७७ ॥
जयेत् समीरदाहास्रपित्तशोषतृषाज्वरान् ।
जीवकर्षभकौ बल्यौ शीतौ शुक्रकफप्रदौ ॥ ७८ ॥
हरतः पित्तदाहास्रकार्श्यशोषक्षयापहौ ।
मेदायुग्मं गुरु स्वादु वृष्यं स्तन्यं कफावहम् ॥ ७९ ॥
बृंहणं शीतलं पित्तं रक्तायाससमीरजित् ।
अष्टवर्गोऽष्टभिर्द्रव्यैरेतैर्भवति शुक्रलः ॥ ८० ॥
बृंहणः पित्तदाहास्रशोषघ्नः स्तन्यगर्भकृत् ।
विशाला कफवातघ्नी मेहकुष्ठहरी सरा ॥ ८१ ॥
सारिवा वातपित्तासृग्विषमज्वरनाशिनी ।
अनन्ता ग्राहिणी रक्तपित्तप्रशमनी हिमा ॥ ८२ ॥
चक्षुष्या मूत्रकृच्छ्रघ्नी गुन्द्रा पित्तास्रदाहनुत् ।
लोध्रोऽस्रकफपित्तघ्नश्चक्षुष्यः शोथजित् सरः ॥ ८३ ॥
तद्वत् शाबरलोध्रोऽपि चक्षुष्यो मृदुरेचनः ।
मधुकं रक्तपित्तघ्नं व्रणशोधनरोपणम् ॥ ८४ ॥

---

१. तर्कारी सर्वतोभद्रा काश्मरी मधुपर्णिकेत्यमरः ।

गुरु स्वादु हितं वृष्यं चक्षुष्यं स्वरवर्णकृत् ।
प्रपौण्डरीकं चक्षुष्यं शिशिरं व्रणरोपणम् ॥ ८५ ॥
मंजिष्टा कुष्ठवीसर्पशोथघ्नी वर्णदा परम् ।
लाक्षा भग्नविसर्पघ्नी बल्या त्वग्दोषनाशनी ॥ ८६ ॥
मुशली मधुरा वृष्या वीर्योष्णा बृंहणी गुरुः ।
तिक्ता रसायनी हन्ति गुदजान्यनिलं तथा ॥ ८७ ॥
द्विधा शतावरी ज्ञेया कण्टकैरधरोत्तरैः ।
द्विविधा तु भवेद् ग्राह्या गुणैस्तेषां न संशयः ॥ ८८ ॥
शीता कषायमधुरा पथ्या वृष्या रसायनी ।
वातपित्तविबन्धघ्नी वर्णौजोबलवर्धनी ॥ ८९ ॥
पार्थः पथ्यः क्षते भग्ने रक्तस्तम्भनहृद्रुजोः ।
अस्थिभग्नेऽस्थिसंहारो हितो बल्योऽनिलापहः ॥ ९० ॥
चक्षुष्यो मार्कवः केश्यः कफपाण्ड्वामयापहः ।
कफामकामलाशोथकृमिघ्नी द्रोणपुष्पिका ॥ ९१ ॥
शोथघ्नी विशदा कण्ठ्याऽनिलघ्नी गिरिकर्णिका ।
कासजिद् वातशमनी वृश्चिकाली विषापहा ॥ ९२ ॥
दुग्धिकोष्णा गुरुर्वृष्या वातला गर्भकारिणी ।
स्वादुर्विष्टम्भिनी वृष्या कफकुष्ठकृमीन् जयेत् ॥ ९३ ॥
अहिंस्रा विषशोथघ्नी तद्गुणैश्च सुदर्शना ।
कासश्वासहरी फञ्जी[१] गुंजा कुष्ठव्रणापहा ॥ ९४ ॥
जयन्ती विषदोषघ्नी सैरीयः कफवातजित् ।
वातरक्तहरी सोष्णा वृष्या बल्या प्रसारणी ॥ ९५ ॥
आमवातानिलास्रघ्नौ कोकिलाक्ष[२]कुलाहलौ[३] ।
हलिनी करवीरश्च कुष्ठदुष्टव्रणापहौ ॥ ९६ ॥
कुकुरुन्दः कटुस्तिक्तो ज्वररक्तकफापहः ।
स्यान्नागदमनी वृष्या लूतासर्पविषापहा ॥ ९७ ॥
ऊर्ध्वाधःकफपित्तघ्नी कुष्ठमावर्त्तकी[४] हरेत् ।
कोशातकी[५] कफार्शोघ्नी पक्वामाशयशोधनी ॥ ९८ ॥
मेध्या ज्योतिष्मती[६] तीव्रा व्रणविस्फोटनाशिनी ।
वयसः स्थापनी ब्राह्मी मेधायुःस्मृतिवर्धनी ॥ ९९ ॥
कफवातासभूतघ्नी वचायुःस्मृतिबुद्धिदा ।

१. भाङ्गीं, २. मखाना, ३. मुड्ड, ४. घुसारी, ५. तिक्ततरोई, ६. मालकांगुणी ।

शंखपुष्पी सरा तिक्ता मेध्या कृमिविषापहा ॥ १०० ॥
मालती[१] कफपितास्त्ररुग्व्रणकृमिकुष्ठनुत् ।
चक्षुष्यं मुकुलं तस्यास्तत्पुष्पं कफपित्तनुत् ॥ १०१ ॥
शिरीषो विषवीसर्पस्वेदत्वग्दोषशोथजित् ।
धत्तूरो मदवर्णाग्निवान्तिकृज्ज्वरकुष्ठनुत् ॥ १०२ ॥
उष्णो गुरुर्व्रणश्लेष्मकण्डूकृमिविषापहः ।
सिक्थकं व्रणवीसर्पकुष्ठवातास्रजित् परम् ॥ १०३ ॥
रक्तपित्तहरी दूर्वा कण्डूत्वग्दोषनाशिनी ।
पाण्डुमेहापचीपित्तत्वग्दोषविषजिन्निशा ॥ १०४ ॥
कफपित्तहरी शोथकण्डूदुष्टव्रणापहा ।
तद्वद् दार्वी विशेषेण कफाभिष्यन्दनाशिनी ॥ १०५ ॥
त्वग्दोषमारुतश्लेष्मविषप्रशमनं स्मृतम् ।
अवल्गुजफलं[२] तद्वत् प्रपुन्नाटस्य चोच्यते ॥ १०६ ॥
कुष्ठगुल्मोदरार्शोघ्नं कटुपाकि तथैव च ।
करंजकिंशुकारिष्टफलं जन्तुप्रमेहनुत् ॥ १०७ ॥
रूक्षोष्णं कटुकं पाके लघु वातकफापहम् ।
तिक्तमीषद्विषहितं विडंगं कृमिनाशनम् ॥ १०८ ॥
आस्फोता[३] विषकुष्ठघ्नी तिनिशो दाहपित्तनुत् ।
असनः कफपित्तघ्नः शिंशपा दाहशोथनुत् ॥ १०९ ॥
धातकी रक्तपित्तघ्नी कदरो[४] दंतदार्ढ्यकृत् ।
आफूकं शोषणं ग्राहि श्लेष्मघ्नं वातपित्तलम् ॥ ११० ॥
वृष्यो बल्यः खसतिलः श्लेष्मघ्नो वातजिद् गुरुः ।
वल्कलस्तत्फलोद्भूतो रूक्षो ग्राही विशोषणः ॥ १११ ॥
अपामार्गोऽग्निकृत्तीक्ष्णः सिंदुवारोऽनिलापहः ।
वंशो व्रणास्रसंहारो भेदनः शोथनाशनः ॥ ११२ ॥
रोहीतको यकृत्प्लीहगुल्मोदरहरः सरः ।
शोथामकफवातघ्नो वृद्धदारो रसायनः ॥ ११३ ॥
भूर्ज्जो व्रणकफास्रघ्नस्तगरः कुष्ठवद् गुणैः ।
कफवातहरी कौन्ती दीपनी न च पित्तकृत् ॥ ११४ ॥
शताह्वा कुष्ठतगरसुरदारुहरेणवः ।

---

१. मिजिनी, २. बाकुचीफलम्, ३. कृष्णापराजिता, ४. कदरः खदिरे सिते ।

एलैलवालुसरलत्वग्व्याघ्रनखचोरकाः ॥ ११५ ॥
लघूष्णाः कटुकाः पाके कफवातनिबर्हणाः ।
श्रीवासः[1] सरलो[2] बोलः[3] कुंदुरु[4] ग्रन्थिपर्णकम्[5] ॥ ११६ ॥
तुरुष्कं[6] सिह्लकं[7] स्पृक्का[8] गुन्द्रा[9] सर्जौ[10] मुरा[11] नखम् ।
सर्वेऽमी पावनाऽलक्ष्मीरक्षोघ्ना ज्वरनाशनाः ॥ ११७ ॥
स्वादुतिक्तरसायुष्याः स्वेददौर्गन्ध्यनाशनाः ।
पित्तास्रविषतृड्दाहक्लमघ्नं गुरु रूक्षकम् ॥ ११८ ॥
सर्वं सतिक्तमधुरं चन्दनं शिशिरं परम् ।
मनोज्ञं चन्दनं श्वेतं रक्तपित्तविषापहम् ॥ ११९ ॥
हृद्यं प्रह्लादनीयं च सतिक्तमतिशीतलम् ।
चक्षुष्यं रक्तपित्तघ्नं व्रण्यं लोहितचन्दनम् ॥ १२० ॥
पतङ्गं[12] तिक्तमधुरं रक्तपित्तकफापहम् ।
पद्मकं पित्तविस्फोटज्वरदाहविषापहम् ॥ १२१ ॥
सेव्यं[13] पित्तास्रतृट्स्वेददाहदौर्गन्ध्यनाशनम् ।
वातघ्नं कुंकुमं चोष्णं वर्ण्यं त्वग्दोषनाशनम् ॥ १२२ ॥
कस्तूरी छर्दिदौर्गन्ध्यवातालक्ष्मीमलापहा ।
कटुतिक्तोष्णमगुरु स्निग्धं वातकफापहम् ॥ १२३ ॥
स्निग्धोष्णं कटुकं पाके सुरदार्वनिलापहम् ।
कत्तृणं तिक्तमधुरं वातश्लेष्मविषापहम् ॥ १२४ ॥
सुगन्धिः कटुको हृद्यः कंकोलः कफवातजित् ।
तद्वज्जातीफलं प्रोक्तं लवंगकुसुमं तथा ॥ १२५ ॥
जातीकोषो लघुस्तृष्णाक्लेददौर्गन्ध्यजिन्मतः ।
सतिक्तकटुकश्चैव बलासस्य विनाशनः ॥ १२६ ॥
कर्पूरः शीतलः स्पर्शो चक्षुष्यः कफनाशनः ।
पक्वात्कर्पूरतः प्राहुरपक्वं गुणवत्तरम् ॥ १२७ ॥
तत्रापि स्याद् यदक्षुद्रं स्फटिकाभं तदुत्तमम् ।
पक्वं च सदलं स्निग्धं हरितद्युति चोत्तमम् ॥ १२८ ॥
भंगे मनागपि न चेन्निपतन्ति कणास्ततः ।
कफदाहास्यवैरस्यमेदःशोथविषापहा ॥ १२९ ॥

---

१. त्रिजयचारनिर्यास, २. धूपसरल, ३. बोर ४ सल्लकीनिर्यास, ५. गठिवन, ६. सिह्लकस्य भेदः सुगन्धद्रव्यं, ७. शिलारस, ८. असपाक, ९. गुगुरी, १०. राल, ११. मठिउर, १२. बकम, १३. उशीरम् ।

एला तृट्छर्दिहृल्लासकंडूपित्तकफापहा ।
सूक्ष्मैला मूत्रकृच्छ्रार्शःश्वासकासकफे हिता ॥ १३० ॥
विबन्धानाहशूलघ्नं लवंगं भुक्तपाचनम् ।
चक्षुष्या मुखरोगघ्नी लताकस्तूरिका[1] हिमा ॥ १३१ ॥
कट्फलं[2] मुखरोगघ्नं कासश्वासज्वरापहम् ।
[3]शताह्वाऽनिलहाऽऽध्मानशूलतृट्छर्दिनाशिनी ॥ १३२ ॥
मधुरा पाचनी वृष्या दाहासृक्पित्तनाशनी ।
फलिनी[4] गात्रदौर्गन्ध्यरक्तपित्तकफापहा ॥ १३३ ॥
शस्ता शोणितपित्तातियोगे गंधप्रियंगुका ।
[5]रास्नोष्णा वातशोथामवातवातामयाञ्जयेत् ॥ १३४ ॥
पौष्करं[6] पार्श्वरुक्कासश्वासहिक्काजरापहम् ।
शटी[7] वातकफश्वासकासज्वरहरी मता ॥ १३५ ॥
मदनो वामनस्तिक्तो वीर्योष्णो लेखनो लघुः ।
रूक्षः कुष्ठकफानाहशोथगुल्मव्रणापहः ॥ १३६ ॥
शृंगी[8] कफानिलश्वासकासहिक्काज्वरापहा ।
वरांगं[9] कफशुक्रामवातघ्नं मधुरं कटु ॥ १३७ ॥
तृट्छर्दिविषहृल्लासकफपित्तविसर्पनुत् ।
त्वग्दोषस्वेददौर्गन्ध्यनाशनो नागकेशरः[10] ॥ १३८ ॥
पत्रकं[11] कफवातार्शोहृल्लासारोचकापहम् ।
तालीशपत्रं[12] तीक्ष्णोष्णं कफकासक्षयापहम् ॥ १३९ ॥
कषाया मधुरा रूक्षा कासघ्नी वंशरोचना[13] ।
तुगाक्षीरी क्षयश्वासकासघ्नी मधुरा हिमा ॥ १४० ॥
वासकः[14] कासवैस्वर्यरक्तपित्तकफापहः ।
कुमारी भेदनी शीता यकृत्प्लीहकफज्वरान् ॥ १४१ ॥
निहन्ति वह्निविस्फोटपित्तरक्तत्वगामयान् ।
बल्याऽमृता त्रिदोषघ्नी ग्राहिण्युष्णा रसायनी ॥ १४२ ॥
दीपनी ज्वरतृट्छर्दिकामलावातरक्तनुत् ।
जराजित् पाण्डुरोगघ्नः क्षयकुष्ठज्वरापहः ॥ १४३ ॥

---

१. दक्षिणदेशे प्रसिद्धा, २. कायफर, ३. सौंफ, ४. प्रियंगु, ५. रासण, ६. पुष्करमूल, ७. सटी, ८. ककड़श्रृंगी, ९. त्वच, १०. नागकेशर, ११. पत्रक, १२. तालीसपत्र, १३. वंशलोचन (वंशमध्ये विभूतिवद् भवति) १४. वासक ।

लेखनो माक्षिको[1] धातुः सुवर्णरजतप्रभः ।
मधुरोऽम्लः कटुः पाके किंचिदुष्णोऽमृतोपमः ॥ १४४ ॥
मेहोन्मादाश्मरीशोथकुष्ठापस्मारशर्कराः ।
हन्याच्छिलाजतु[2] क्षिप्रं कटुपाकं रसायनम् ॥ १४५ ॥
सर्वदोषहरं योगवाहि चानुष्णशीतलम् ।
विशदो गैरिकः स्निग्धः कषायो मधुरो हिमः ॥ १४६ ॥
सुवर्णगैरिकं तद्वच्चक्षुष्यं तद् विशेषतः ।
तुत्थकं[4] कटु सक्षारं कषायं विशदं लघु ॥ १४७ ॥
लेखनं भेदि चक्षुष्यं कण्डूकृमिविषापहम् ।
कफघ्नी तिक्तकटुका मनोह्वा[5] लेखनी सरा ॥ १४८ ॥
स्निग्धं कषायं कटुकं हरितालं[6] विषप्रणुत् ।
कषायं मधुरं शीतं लेखनं स्निग्धमंजनम्[7] ॥ १४९ ॥
रक्तपित्तविषच्छर्दिसिध्मघ्नं दृक्प्रसादनम् ।
स्रोतोञ्जनं वरं तत्र ततः सौवीरकांजनम्[8] ॥ १५० ॥
कफजं तिक्तकटुकं छेदि सोष्णं रसायनम् ।
पारदः[9] कृमिकुष्ठघ्नः चक्षुष्योऽथ रसायनः ॥ १५१ ॥
अभ्रं गुरु हिमं बल्यं कुष्ठमेहत्रिदोषनुत् ।
हिंगुलं[10] पित्तकफनुच्चक्षुष्यं विषकुष्ठनुत् ॥ १५२ ॥
गंधकं[11] कृमिकुष्ठघ्नं विषनेत्रामयापहम् ।
चक्षुष्यं श्वेतमरिचं चक्षुष्या पीतरोहिणी ॥ १५३ ॥
सक्षार उष्णवीर्यश्च काचो[12] दृष्टिकृदंजनात् ।
वन्दाकः कफवातास्रक्षोत्रणविषापहः ॥ १५४ ॥
काशीशद्वयमम्लोष्णं तिक्तं केश्यं दृशोर्हितम् ।
हन्ति कण्डूविषश्वित्रमूत्राघातकफानिलान् ॥ १५५ ॥
लघुशंखादयः शीताः (नेत्रदोषपहाः स्मृताः) ।
[13]शंखोदधिमलौ शीतौ कषायावतिलेखनौ ॥ १५६ ॥
मुक्ताविद्रुमवज्रेन्द्रवैडूर्यस्फाटिकादिकम् ।

---

१. सुवर्णमाक्षिक, २. शिलाजतु, ३. गेरू, ४. तूथ, ५. मनशिल, ६. हरिताल, ७. अंजनं रसांजनम्, तत्तु-द्विविधं, स्रोतोञ्जनं कृष्णं पाषाणाकृति धातुद्रव्यम् ; द्वितीयं दारुहरिद्राक्वाथेन कृत्रिमं पीतलोहितम् । तत्र तयोः कृष्णां वरं, ततस्तेषां मध्ये सौवीराञ्जनं वरम् । रसाञ्जनं ८. सौवीरांजन, ९. पारा, १०. इंगुर, ११. गंधक १२. काच, १३. शंख ।

मणिरत्नं सरं शीतं कषायं स्वादु लेखनम् ॥ १५७ ॥
चक्षुष्यं धारणात्तत्तु पापालक्ष्मीविषापहम् ।
कषायं तिक्तमधुरं सुवर्णं[1] गुरु लेखनम् ॥ १५८ ॥
हृद्यं रसायनं बल्यं चक्षुष्यं कान्तिदं शुचि ।
आयुर्मेधास्मृतिस्थैर्यवाग्विभूतिमतिप्रदम् ॥ १५९ ॥
क्षयोन्मादगदार्त्तानां शमनं परमुच्यते ।
रूप्यं[2] स्निग्धं कषायाम्लं विपाके मधुरं सरम् ॥ १६० ॥
वयसः स्थापनं शीतं लेखनं वातपित्तजित् ।
ताम्रं[3] सतिक्तमधुरं कषायं लेखनं लघु ॥ १६१ ॥
कटुपाकरसं शीतं रोपणं कफवातजित् ।
कांस्यं[4] कषायानुरसं विशदं लेखनं सरम् ॥ १६२ ॥
दृष्टिप्रसादनं रूक्षं तिक्तं पित्तकफापहम् ।
सतिक्तलवणं छेदि पाण्डुत्वकृमिवातनुत् ॥ १६३ ॥
लेखनं पित्तलं किंचित् त्रपु[5] सीसं[6] च तद्गुणम् ।
कृष्णायः[7]शोथशूलार्शःकुष्ठपाण्डुत्वमेहनुत् ॥ १६४ ॥
वयस्यं गुरु चक्षुष्यं सरं मेदोगरापहम् ।
यल्लोहं[8] यद्गुणं प्रोक्तं तत्किट्टमपि[9] तद्गुणम् ॥ १६५ ॥
किट्टाद् दशगुणं मुण्डं मुण्डात्तीक्ष्णं शतोन्मितम् ।
तीक्ष्णाल्लक्षगुणं कान्तं तस्मात् कान्तं समाहरेत् ॥ १६६ ॥
[10]सिंदूरमुष्णवीर्यं च कुष्ठपाण्डुविषापहम् ।
भग्नसन्धानजननं व्रणशोधनरोपणम् ॥ १६७ ॥
कफपित्तविषार्त्तिघ्नी सौराष्ट्री व्रणशोधनी ।
पंकः पित्तास्रदाहघ्नो भग्नक्षतहितो हिमः ॥ १६८ ॥
केश्यो [11]हस्तिमदश्चित्तरंजनो विषनाशनः ।
सर्पपित्तमपस्मारकुष्ठदुष्टव्रणापहम् ॥ १६९ ॥
चक्षुष्यं कटुतीक्ष्णोष्णमुन्मादकृमिनाशनम् ।

---

१. सुवर्ण, २. रूप, ३. ताम्बा, ४. कांस, ५. रांग, ६. सीस, ७. लोह ।
८. यत्पात्रस्थः प्रसरति जले तैलबिन्दुर्न दत्तो
हिंगुर्गन्धं विसृजति निजां तिक्ततां निम्बकल्कः ।
पाच्यं दुग्धं भवति शिखराकारकं नैति भूमिं
कृष्णाङ्गं स्यात् सजकजनकं कान्तलोहं तदुक्तम् ॥
९. कीटी, १०. सिन्दूर, ११. हस्तिनां सर्वप्रदेशोद्भवं मदम् ।

[१]गोरोचनातिमंगल्या विषालक्ष्मीग्रहापहा ।। १७० ।।
कषायं मधुरं शीतं पद्मं पित्तकफास्रजित् ।
तद्वत् [२]बकुलपुन्नागकह्लारोत्पलपाटलम् ।। १७१ ।।
सचंपकं ततो न्यूनं गुणैः कौरण्टकिंशुकम् ।
कुमुदोत्पलनालाश्च सपुष्पाः सफलाः स्मृताः ।। १७२ ।।
शीताः स्वादुकषायाश्च कफमारुतकोपनाः ।
शणस्य कोविदारस्य[३] कर्बुदारस्य[४] शाल्मलेः ।। १७३ ।।
पुष्पं ग्राहि प्रशस्तं च रक्तपित्तविशोषणम् ।
बन्धूकं श्लेष्मलं ग्राहि तद्वदेव च यूथिका[५] ।। १७४ ।।
रक्तपित्तातिसारघ्नं धातकीकुसुमं[६] हिमम् ।
मुचकुन्दं[७] शिरोर्तिघ्नं पित्तास्रघ्नं महागुणम् ।। १७५ ।।
वातघ्नी मल्लिका तिक्ता रंजनी स्तम्भनी [८]जपा ।
वृषागस्तिकयोः पुष्पं तिक्तं पित्तकफापहम् ।। १७६ ।।
क्षयकासापहं पाके कटुकं वातकोपनम् ।
कफघ्नं केतकं तिक्तं शैरीषं विषहारि च ।। १७७ ।।

इति विविधौषधिवर्गः ।

---

१. गोरोचन, २. देवकाष्ठं तच्च दक्षिणदेशे, ३. कचनार, ४. वेवहार, ५. जूही, ६. धाईपुष्प, ७. मुचुकुन्द, ८. माला ।

२. लवणवर्गः

विष्यन्दि लवणं सर्वं सूक्ष्मं सृष्टमलं विदुः।
वातघ्नं पाकि तीक्ष्णोष्णं रोचनं कफपित्तकृत् ॥ १ ॥
सुस्वादु लघु चक्षुष्यं वृष्यं रोचनदीपनम्।
अविदाहि विबन्धघ्नं सैन्धवं[१] त्रिमलापहम् ॥ २ ॥
सामुद्रं[२] मधुरं पाके नात्युष्णमविदाहि च।
भेदनं स्निग्धमीषच्च शूलघ्नं नातिपित्तलम् ॥ ३ ॥
आनुलोम्यकरं रुच्यं शूलघ्नं दीपनं बिडम्[३]।
लघु सौवर्चलं[४] हृद्यं विबन्धानाहशूलनुत् ॥ ४ ॥
सौवर्चलगुणाः कृष्णे[५] लवणे गंधवर्जिताः।
रोचनं दीपनं स्वादु रोमकं[६] मारुतापहम् ॥ ५ ॥
सतिक्तं कटुकक्षारं तीक्ष्णमुत्क्लेदि चौद्भिदम्[७]।
कफवातकृमिहरं लेखनं पत्तिकोपनम् ॥ ६ ॥
दीपनं पाचनं भेदि लवणं [८]गुटिकाह्वयम्।
पांशुजं[९] तिक्तमुष्णं च शोथपित्तकफापहम् ॥ ७ ॥
गुल्महृद्ग्रहणीपाण्डुप्लीहानाहगलामयान् ।
श्वासार्शःकफवातांश्च शमयेद्यावशूकजः[१०] ॥ ८ ॥
तस्मादल्पगुणश्चैव सर्जिकाक्षार[११] इष्यते।
सुधाक्षारोऽग्निना तुल्यः क्लेदी पाकी विदारणः ॥ ९ ॥
स्वाद्वम्लो मधुरः शीतो लघुः स्रोतोविशोधनः।
अनपत्यकरः श्रेष्ठः पालाशः सर्वकर्मसु ॥ १० ॥
पूतीकनक्तमालार्कधवमुष्ककपाटलाः ।
सर्षपत्रपुषैर्वारुकदलीतिलशिग्रुजाः ॥ ११ ॥
कोशातकीन्द्रतर्कारी[१२]शिरीषवरुणाग्निजाः ।
क्षाराश्चान्येऽपि गुल्मार्शोग्रहणीरुक्छिदः सराः ॥ १२ ॥
पाचनाः कृमिपुंस्त्वघ्नाः शर्कराश्मरिनाशनाः।
चक्षुःकेशौजसां नेष्टा रक्तपित्तकराः स्मृताः ॥ १३ ॥
(अग्निदीप्तिकरस्तीक्ष्णः टंकणक्षार उच्यते) ।

इति लवणवर्गः।

---

१. सैंधव, २. पांगा, ३. बिडिआ, ४. सौंचर, ५. चौहाड, ६. गड, ७. खारी, ८. समाडी, ९. द्वितीय खारी, १०. जवखार, ११. साजी, १२. अगेथु।

३. इक्षुवर्गः

(ऐक्षवा मधुरा बल्या विपाके गुरुशीतलाः) ।
स्निग्धा बल्या मूत्रलाश्चवृष्याः प्रीणनबृंहणाः ॥ १ ॥
कृमिश्लेष्मकराश्चेति ते चानेकविधाः स्मृताः ।
पुण्ड्रको भीरुकश्चेति वंशकः शतपोनकः ॥ २ ॥
कान्तारेक्षुस्तापसेक्षुः काण्डेक्षुः सूचिपत्रकः ।
नेपालो दीर्घपत्रश्च नलपोरोऽथ कोशकृत् ॥ ३ ॥
इत्येते ज्ञातयः स्थौल्याद् गुणत्वक्सारतो मताः ।
सुशीतो मधुरः स्निग्धो बृंहणः श्लेष्मलः सरः ॥ ४ ॥
अविदाही गुरुर्वृष्यः पौण्ड्रको भीरुकस्तथा ।
आभ्यां तुल्यगुणः किंचित् सक्षारो वंशकः स्मृतः ॥ ५ ॥
वंशवत् शतपोनस्तु किंचिदुष्णः स वातहा ।
कान्तारतापसाविक्षू वंशकानुगतौ मतौ ॥ ६ ॥
एवंगुणस्तु कान्तेक्षुः स च वातप्रकोपणः ।
सूचीपत्रो नीलपोरो नेपालो दीर्घपत्रकः ॥ ७ ॥
वातलाः कफपित्तघ्नाः सकषाया विदाहिनः ।
कोशकारो गुरुः शीतो रक्तपित्तक्षयापहः ॥ ८ ॥
अतीव मधुरो मूले मध्ये मधुर एव च ।
अग्रे ग्रन्थित्वचोर्ज्ञेये लवणो रस एव च ॥ ९ ॥
वातासृक्पित्तजित् स्वादुः स्निग्धः प्रीणनबृंहणः ।
[1]जीवनस्तर्पणो[2] वृष्यः शीतश्चेक्षुरसः सरः ॥ १० ॥
अविदाही कफकरो वातपित्तनिबर्हणः ।
वक्त्रप्रसादनो वृष्यो दन्तनिष्पीडितो रसः ॥ ११ ॥
गुरुर्विदाही विष्टम्भी यान्त्रिकस्तु प्रकीर्त्तितः ।
पक्वो गुरुः सरः स्निग्धः सतीक्ष्णः कफवातजित् ॥ १२ ॥
फाणितं गुर्वभिष्यन्दि बृंहणं कफशुक्रलम् ।
बल्यो वृष्यो गुरुः स्निग्धो वातघ्नो मूत्रशोधनः ॥ १३ ॥
नातिपित्तहरो मेदःकफकृमिकरो गुडः ।
पित्तघ्नो मधुरः स्निग्धो वातहासृक्प्रसादनः ॥ १४ ॥

---

१. ओजोवृद्धिकरः, २. इन्द्रियाणां तृप्तिकरः ।

स पुराणोऽधिकगुणो गुडः पथ्यतमः स्मृतः।
गुडमत्स्यण्डिका खण्डशर्करा विमलाः परम् ॥ १५ ॥
यथा यथैषां वैमल्यं भवेच्छैत्यं तथा तथा।
स्नेहगौरवमाधुर्यं सञ्चरेच्च तथा तथा ॥ १६ ॥
वातपित्तहरं स्निग्धं शीतं बल्यं मुखप्रियम्।
चक्षुष्यं बृंहणं बल्यं खण्डं वृष्यतमं मतम् ॥ १७ ॥
वृष्या क्षीणक्षतहिता सस्नेहा गुडशर्करा।
क्षीणक्षतहिता वृष्या स्निग्धा खण्डस्य शर्करा ॥ १८ ॥
मूत्रकृच्छ्राश्मरीप्लीहहिता सामुद्रिकोद्भवा[1]।
ज्वरासृक्पित्ततृट्छर्दिमोहमूर्च्छाविषार्त्तिषु ॥ १९ ॥
सर्वा एवामृतप्रख्याः शर्कराः समुदाहृताः।
सारोत्थिता निर्म्मलाश्च त्यक्तक्षारा यथा यथा ॥ २० ॥
तथा तथा वीर्यवत्यः शीतवीर्याश्च शर्कराः।
छर्द्यतीसारतृष्णाघ्नी विरूक्षा मधुशर्करा ॥ २१ ॥
(सितोपला[2] सरा गुर्वी वातपित्तहरा हिमा)

इतीक्षुवर्गः।

---

१. सामुद्रलवणयुक्ता, २. नौवात।

४. मधुवर्गः

पौत्तिकं भ्रामरं क्षौद्रं माक्षिकं छात्रमेव च ।
आर्घ्यमौद्दालकं दालमित्यष्टौ मधुजातयः ॥ १ ॥
माक्षिकं तैलसंकाशं पौत्तिकं घृतसन्निभम् ।
क्षौद्रं कपिलवर्णांगं भ्रामरं स्फटिकामलम् ॥ २ ॥
कषायानुरसं रूक्षं शीतलं मधुरं मधु ।
दीपनं लेखनं बल्यं व्रणशोधनरोपणम् ॥ ३ ॥
संधानं लघु चक्षुष्यं स्वर्यं हृद्यं त्रिदोषजित् ।
छर्दिहिक्काविषश्वासकासशोषातिसारनुत् ॥ ४ ॥
रक्तपित्तहरं ग्राहि क्रिमितृण्मोहहृत्परम् ।
पैच्छिल्यात् स्वादुभूयस्त्वात्पौत्तिकं गुरु संस्मृतम् ॥ ५ ॥
भ्रामरं कुरुते जाड्यं भूयिष्ठं मधुरं च यत् ।
क्षौद्रं विशेषतो ज्ञेयं शीतलं लघु लेखनम् ॥ ६ ॥
तस्माल्लघुतरं रूक्षं माक्षिकं प्रवरं स्मृतम् ।
श्वासादिषु च रोगेषु प्रशस्तं तद्विशेषतः ॥ ७ ॥
स्वादुपाकं गुरु हिमं पिच्छिलं रक्तपित्तजित् ।
श्वित्रमेहक्रिमिघ्नं च विद्याच्छात्रं गुणोत्तरम् ॥ ८ ॥
आर्घ्यं मध्वतिचक्षुष्यं कफपित्तहरं परम् ।
कषायं कटुकं पाके बल्यं पित्तास्रवातकृत् ॥ ९ ॥
औद्दालकं रुचिकरं स्वर्यं कुष्ठविषापहम् ।
कषायमुष्णमम्लं च पित्तकृत् कटुपाकि च ॥ १० ॥
छर्दिमेहप्रशमनं मधु रूक्षं दलोद्भवम् ।
विशेषात् पौत्तिकं तेषु रक्षोघ्नं सर्पिषान्वयात् ॥ ११ ॥
(दोषत्रयहरं पक्वं दुष्टमामं त्रिदोषकृत्)
बृंहणीयं मधु नवं नातिश्लेष्महरं परम् ।
मेदः स्थौल्यापहं ग्राहि पुराणमतिलेखनम् ॥ १२ ॥
उष्णैर्विरुध्यते सर्वं विषान्वयतया मधु ।
उष्णार्त्तमुष्णैरुष्णेन तन्निहन्ति यथा विषम् ॥ १३ ॥
तत्सौकुमार्याच्च तथैव शैत्यान्नानौषधीनां रससंभवाच्च ।
उष्णै विरुध्येत विशेषतस्तु तथान्तरिक्षेण जलेन चापि ॥ १४ ॥
तद्युक्तं विविधैर्द्रव्यैर्निहन्यादामयान्बहून् ।
नानाद्रव्यात्मकत्वाच्च योगवाहि परं मधु[1] ॥ १५ ॥

॥ इति मधुवर्गः ॥

---

१. उष्णेन मधुसंयुक्तं वमनेष्ववचारितम् ।
अपाकादनवस्थानाद् न विरुध्येत पूर्ववत् ॥

२ मा०

५. क्षीरवर्गः

गव्यमाजं तथौरभ्रं माहिषं कारभं तथा।
अश्वायाश्चापि नार्याश्च करेणूनां च यत्पयः॥ १॥
तत्त्वनेकौषधिरसं प्राणिनां प्राणदं गुरु।
मधुरं पिच्छिलं स्निग्धं शीतं सूक्ष्मं सरं स्मृतम्॥ २॥
पथ्यं रसायनं हृद्यं बल्यं मेध्यं गवां पयः।
आयुष्यं पुंस्त्वकृद्वातरक्तपित्तविकारनुत्॥ ३॥
छागं कषायमधुरं शीतं ग्राहि पयो लघु।
रक्तपित्तातिसारघ्नं क्षयकासज्वरापहम्॥ ४॥
अजानामल्पकायत्वात् कटुतिक्तनिषेवणात्।
नात्यम्बुपानाद् व्यायामात् सर्वव्याधिहरं पयः॥ ५॥
औरभ्रं मधुरं स्निग्धमुष्णं वातकफापहम्।
गुरु शुद्धेऽनिले पथ्यं कासे चानिलशोणिते॥ ६॥
महाभिष्यन्दि मधुरं माहिषं वह्निनाशनम्।
निद्राकरं शीतकरं गव्यात् स्निग्धतरं गुरु॥ ७॥
रूक्षोष्णं क्षीरमुष्ट्रीणामीषत्सलवणं लघु।
शस्तं वातकफानाहकृमिशोथोदरार्शसाम्॥ ८॥
उष्णमैकशफं बल्यं शाखावातहरं परम्।
मधुराम्लरसं रूक्षं लवणानुरसं लघु॥ ९॥
स्निग्धं स्थैर्यकरं शीतं चक्षुष्यं बलवर्द्धनम्॥ १०॥
जीवनं बृंहणं सात्म्यं स्नेहनं मानुषं पयः।
नावनं रक्तपित्ते तु तर्पणं चाक्षिशूलिनाम्॥ ११॥
विवत्साबालवत्सानां पयो दोषलमीरितम्।
कृष्णायाः कृष्णवत्सायाः शुक्लायाश्च वरं पयः॥ १२॥
शृतोष्णं कफवातघ्नं शृतशीतं सुपित्तजित्।
आममामकरं चामं धारोष्णममृतं पयः॥ १३॥
वर्जयित्वा स्त्रियाः स्तन्यमाममेव हि तद्धितम्।
सुशृतं यत्पयः पीतं पीयूषं यच्च तद् गुरु॥ १४॥
क्षीरं सद्यःप्रसूतायाः पीयूषं सलिलं घनम्।
सप्तरात्रात्परं क्षीरमप्रसन्नं च मोरटम्॥ १५॥

कूर्चिकाश्च किलाटाश्च गुरवः श्लेष्मवर्धनाः ।
तर्पणाः प्रीणनाः बल्या बृंहणाः मारुतापहाः ॥ १६ ॥

दीप्ताग्नीनामनिद्राणां व्यवाये चातिपूजिताः ।
गवां प्रत्युषसि क्षीरं गुरु विष्टंभि दोषजम् ॥ १७ ॥

दिवाकरांशुसंतप्तं व्यायामानिलनाशनम् ॥
क्षीरसंतानिका वृष्या स्निग्धा पित्तानिलापहा ॥ १८ ॥

जीर्णज्वरे कफे क्षीणे स्वल्पदोषे पिपासिते ।
दाहार्ते च पयो योज्यं तन्नवे तु विषं भवेत् ॥ १९ ॥
जीर्णज्वरे कफे क्षीणे क्षीरं स्यादमृतोपमम् ।
तदेव तरुणे पीतं विषवद्धन्ति मानवम् ॥ २० ॥

प्रायः प्राभातिकं क्षीरं गुरु विष्टंभि शीतलम् ।
रात्र्याः सोमगुणत्वाच्च व्यायामाभावतस्तथा ॥ २१ ॥

दिवाकराभितप्ताया व्यायामानिलसेवनात् ।
वातपित्तश्रमघ्नं च चक्षुष्यं चापराह्णिकम् ॥ २२ ॥

अनिष्टगन्धमम्लं च विवर्णं विरसं च यत् ।
वर्ज्यं सलवणं क्षीरं यच्च विग्रथितं भवेत् ॥ २३ ॥

वृष्यं बृंहणमग्निदीपनकरं पूर्वाह्णकाले पयो
मध्याह्ने बलवर्धनं रतिकरं कामाग्निसंदीपनम् ।
बालेष्वग्निकरं क्षये हितकरं वृद्धेषु वीर्यप्रदम्
रात्रौ पथ्यमनेकदोषहरणं क्षीरं हितं चक्षुषाम् ॥ २४ ॥
(धारोष्णममृतं गव्यं धाराशीतं तु माहिषम् ।
शृतशीतमजाक्षीरं शृतोष्णं चाविकं पयः ॥
क्षीरसंतानिका बल्या वृष्या पित्तानिलापहा ।
संतानिका स्त्यानरूपा शृतदुग्धोपरि स्थिता ॥
दध्ना सह पयः पक्वं यत्तत् स्याद् दधिकूर्चिका ।
तक्रेण पक्वं यत् क्षीरं सा भवेत्तक्रकूर्चिका ॥)

इति क्षीरवर्गः ।

---

६. दधिवर्गः

अम्लं स्वादुरसं ग्राहि गुरूष्णं दधि वातजित्।
मेदःशुक्रबलश्लेष्मरक्तपित्ताग्निशोफकृत् ॥ १ ॥

स्निग्धं विपाके मधुरं दीपनं बलवर्द्धनम्।
वातापहं पवित्रं च दधि गव्यं रुचिप्रदम् ॥ २ ॥

दध्याजं कफवातघ्नं लघु पित्तक्षयापहम्।
दुर्नामश्वासकासेषु हितमग्नेश्च दीपनम् ॥ ३ ॥

विपाके मधुरं वृष्यं रक्तपित्तप्रसादनम्।
बलासवर्धनं स्निग्धं विशेषाद्दधि माहिषम् ॥ ४ ॥

विपाके कटु सक्षारमम्लं भेद्यौष्ट्रकं दधि।
वातामार्शांसि कुष्ठानि कृमीन् हन्त्युदराणि च ॥ ५ ॥

रसे पाके च मधुरमत्यभिष्यंदि दोषलम्।
दीपनीयमचक्षुष्यं वातलं दधि बाडवम् ॥ ६ ॥

रूक्षमुष्णं कषायं च कफमूत्रापहं च यत्।
लघु पाके बलासघ्नं वीर्योष्णं पक्तृनाशनम् ॥ ७ ॥

कषायानुरसं नागं दधि वर्चोविबंधकृत्।
स्निग्धं विपाके मधुरं बल्यं संतपर्णं गुरु ॥ ८ ॥

चक्षुष्यमग्र्यं दोषघ्नं दधि नार्या गुणोत्तरम्।
रसे पाके च मधुरं कषायानुरसं लघु ॥ ९ ॥

कोपनं कफवातस्य दुर्नाम्नां चाविकं दधि।
महाभिष्यन्दि मधुरं कफमेदोविवर्धनम् ॥ १० ॥

कफपित्तकृदम्लं स्यादत्यम्लं रक्तदूषणम्।
विदाहि सृष्टविण्मूत्रं मंदजातं त्रिदोषकृत् ॥ ११ ॥

वातघ्नं कफकृत् स्निग्धं बृंहणं तच्च पित्तकृत्।
कुर्याद् भक्ताभिलाषं च दधि यत् तु परिस्रुतम् ॥ १२ ॥

शृतक्षीरात्तु यज्जातं गुणवद्दधि तत्स्मृतम्।
वातपित्तहरं वृष्यं धात्वग्निबलवर्धनम् ॥ १३ ॥

दधि त्वसारं रूक्षं च ग्राहि विष्टंभि वातलम् ।
दीपनीयं लघुतरं सकषायं रुचिप्रदम् ॥ १४ ॥
सरः स्निग्धो गुरुर्वृष्यः कफमेदोविवर्धनः ।
बृंहणो मारुतघ्नश्च बलोपचयकृत् परम् ॥ १५ ॥
कफवातापहं भेदि मस्तु स्रोतोविशोधनम् ।
पीनसे चातिसारे च शीतके विषमज्वरे ॥ १६ ॥
अरुचौ मूत्रकृच्छ्रे च कार्श्ये च दधि शस्यते ।
शरद्ग्रीष्मवसन्तेषु प्रायशो दधि गर्हितम् ॥ १७ ॥
हेमन्ते शिशिरे चैव वर्षासु दधि शस्यते ।
रक्तपित्तकफोत्थेषु विकारेषु हितं च तत् ॥ १८ ॥
न नक्तं दधि भुंजीत न चाप्यघृतशर्करम् ।
नामुद्गसूपं नाक्षौद्रं नोष्णं नामलकैर्विना ॥ १९ ॥
ज्वरासृक्पित्तवीसर्पकुष्ठपाण्ड्वामयभ्रमान् ।
प्राप्नुयात् कामलां चोग्रां विधिं हित्वा दधिप्रियः ॥ २० ॥

॥ इति दधिवर्गः ॥

७. तक्रवर्गः

तक्रं लघु कषायाम्लं दीपनं कफवातजित्।
शोफोदरार्शोग्रहणीदोषमूत्रग्रहारुचीः ॥ १ ॥
गुल्मप्लीहघृतव्यापद्गरपाण्ड्वामयाञ्जयेत् ।
समुद्धृतघृतं तक्रमर्धोद्धृतघृतं च तत् ॥ २ ॥
अनुद्धृतघृतं चान्यदित्येतत् त्रिविधं मतम्।
पूर्वं लघु च पथ्यं च गुरु वृष्यमतः परम् ॥ ३ ॥
ततः परं वृष्यतमं यथाक्रमसुदीरितम्।
अम्लं चात्यम्लमेवान्यत् कषायं स्वादु चापरम् ॥ ४ ॥
तनु सान्द्रं सान्द्रतरं गुरु विद्याद् यथोत्तरम्।
तत्र यच्चोद्धृतस्नेहं साम्लं समधुरं च यत् ॥ ५ ॥
कषायानुरसं स्वादु न सान्द्रं तद्विशेषतः।
गरोदरार्शोग्रहणीपाण्डुरोगे ज्वरेऽरुचौ ॥ ६ ॥
वर्चोमूत्रग्रहे प्लीह्नि स्नेहव्यापदि मेहिषु।
कषायशीतमाधुर्यैस्तदुत्कृष्टतमं मतम् ॥ ७ ॥
तर्पणं प्रीणनं हृद्यं बल्यं पित्ताविरोधि च।
तक्रं केवलमत्यम्लं श्लेष्मानिलहरं लघु ॥ ८ ॥
लेखनं दीपनीयं च रक्तपित्तप्रकोपणम्।
तक्रमामं कफं हन्ति कोष्ठे कंठे करोति च ॥ ९ ॥
पीनसश्वासकासादौ सिद्धमेतद्विशिष्यते।
ससरं निर्जलं घोलं मथितं रसवर्जितम् ॥ ९ ॥
अर्द्धोदकमुदश्वित् स्यातक्रं पादजलान्वितम्।
वातपित्तहरं घोलमुदश्विच्छ्लेष्मलं भवेत्[1] ॥ १० ॥
त्रिदोषशमनं तक्रं मथितं श्लेष्मपित्तकृत्।
नैव तक्रं क्षते दद्यान्नोष्णकाले न दुर्बले ॥ १२ ॥
न मूर्च्छाभ्रमदाहेषु न रोगे रक्तपैत्तिके।
शीतकालेऽग्निमान्द्ये च कफोत्थेष्वामयेषु च ॥ १३ ॥

---

१. श्लेष्मनुद् भवेत्।

मार्गावरोधे दुष्टे च वायौ तक्रं प्रशस्यते।
वातेऽम्लं सैन्धवोपेतं स्वादु पित्ते सशर्करम्॥ १४॥

पिबेत्तक्रं कफे वापि व्योषक्षारसमन्वितम्।
ग्राहिणी वातला रूक्षा दुर्जरा तक्रकूर्च्चिका॥ १५॥

तक्राल्लघुतरो मंडः कूर्चिकादधितक्रजः[1]।
गुरुः किलाटोऽनिलहृत् पुंस्त्वनिद्राबलप्रदः॥ १६॥

(मधुरौ बृंहणौ वृष्यौ तद्वत्पीयूषमोरणौ॥)
जीर्णज्वरे पाण्डुसकामलायामामातिसारे ग्रहणीगदे च।
अर्शःसु[2] गुल्मोदरवातशूले तक्रं पिबेन्नित्यमरोचके च॥ १७॥

अम्लेन वातं मधुरेण पित्तं कफं कषायेन निहन्ति तक्रम्।
तस्माच्च तक्रं ज्वरितेषु देयं तक्रेण दग्धा न भवन्ति रोगाः॥१८॥

न तक्रसेवी व्यथते कदाचिन्न तक्रदग्धाः प्रभवन्ति रोगाः।
यथा सुराणाममृतं प्रधानं तथा नराणां भुवि तक्रमाहुः॥ १९॥

॥ इति तक्रवर्गः॥

---

१. कूर्च्चिकोद्भूतं यद् दधि तक्रं वा ताभ्यां जातो मण्डः।
२. In text it is 'अर्शांसि' but it should be 'अर्शःसु'।

८. नवनीतवर्गः

नवनीतं नवं ग्राहि हृद्यं रोचनदीपनम् ।
क्षयारुच्यर्दितप्लीहग्रहण्यर्शोविकारनुत् ॥ १ ॥

चक्षुष्यं शिशिरं स्निग्धं वृष्यं जीवनबृंहणम् ।
क्षीरोद्भवं हिमं ग्राहि रक्तपित्ताक्षिरोगनुत् ॥ २ ॥

विकल्प एवं दध्यादिः श्रेष्ठो गव्योऽभिवर्णितः ।
विकल्पानविशिष्टांस्तु क्षीरवीर्यान् समादिशेत् ॥ ३ ॥

॥ इति नवनीतवर्गः ॥

६. घृतवर्गः

स्मृतिबुद्ध्यग्निशुक्रौजःकफमेदोविवर्द्धनम् ।
वातपित्तकफोन्मादशोषालक्ष्मीज्वरापहम् ॥ १ ॥
सर्वस्नेहोत्तमं शीतं मधुरं रसपाकयोः ।
सहस्रवीर्यं विधिवद् घृतं कर्मसहस्रकृत् ॥ २ ॥
विपाके मधुरं वृष्यं वातपित्तकफापहम् ।
चक्षुष्यं बृंहणं बल्यं गव्यं सर्पिर्गुणोत्तरम् ॥ ३ ॥
आजं सर्पिर्दीपनीयं चक्षुष्यं बलवर्द्धनम् ।
कासे श्वासे क्षये चापि पथ्यं पाके च तल्लघु ॥ ४ ॥
मधुरं रक्तपित्तघ्नं गुरु पाके कफावहम् ।
वातपित्तप्रशमनं सुशीतं माहिषं घृतम् ॥ ५ ॥
औष्ट्रं कटु घृतं पाके शोथकृमिविषापहम् ।
दीपनं कफवातघ्नं कुष्ठगुल्मोदरापहम् ॥ ६ ॥
पाके लघ्वाविकं सर्पिर्न च पित्तप्रकोपणम् ।
कफेऽनिले योनिदोषे शोफे कंपे च तद्धितम् ॥ ७ ॥
पाके लघूष्णवीर्यन्तु कषायं कफनाशनम् ।
दीपनं बद्धविण्मूत्रं विद्यादैकशफं घृतम् ॥ ८ ॥
कषायं बद्धविण्मूत्रं तिक्तमग्निकरं लघु ।
हंति कारेणवं सर्पिः कफकुष्ठविषक्रमीन् ॥ ९ ॥
चक्षुष्यमग्र्यं स्त्रीणां तु सर्पिः स्यादमृतोपमम् ।
वृद्धिं करोति देहाग्न्योर्लघु पाके विषापहम् ॥ १० ॥
तर्पणं नेत्ररोगघ्नं दाहनुत् पयसो घृतम् ।
सर्पिः पुराणं तिमिरप्रतिश्याश्वासकासनुत् ॥ ११ ॥
मूर्च्छाकुष्ठविषोन्मादग्रहापस्मारनाशनम् ।
योनिकर्णाक्षिशिरसां शूलघ्नं शोकजित् परम् ॥ १२ ॥
हन्ति दोषत्रयं भेदि व्रणशोधनरोपणम् ।
तद्वच्च घृतमंडोऽपि रूक्षस्तीक्ष्णस्तनुस्तु सः ॥ १३ ॥

॥ इति घृतवर्गः ॥

---

१०. तैलवर्गः

कषायानुरसं स्वादु सूक्ष्ममुष्णं व्यवायि च।
पित्तलं बद्धविण्मूत्रं न च श्लेष्मविवर्धनम्॥ १॥
वातघ्नेषूत्तमं बल्यं त्वच्यं मेधाग्निवर्धनम्।
तैलं संयोगसंस्कारात् सर्वरोगापहं मतम्॥ २॥
छिन्नभिन्नच्युतोत्पिष्टमथितक्षतपिच्चिते।
भग्नस्फुटितविद्धाग्निदग्धविश्लिष्टदारिते॥ ३॥
तथाभिहतनिर्भुग्ने मृगव्यालादिभक्षिते।
सेकाभ्यंगावगाहेषु तिलतैलं प्रशस्यते॥ ४॥
तद्बस्तिषु च पानेषु नस्ये कर्णाक्षिपूरणे।
अन्नपानविधौ चापि प्रयोज्यं वातशान्तये॥ ५॥
वातघ्नं मधुरं तेषु क्षौमं तैलं बलापहम्।
कटुपाकमचक्षुष्यं स्निग्धोष्णं कटु पित्तलम्॥ ६॥
कृमिघ्नं सार्षपं तैलं कंडूकुष्ठापहं लघु।
कफमेदोऽनिलहरं लेखनं कटु दीपनम्॥ ७॥
हृद्बस्तिपार्श्वजानूरुत्रिकपृष्ठास्थिशूलिनाम्।
आनाहाष्ठीलपित्तासृक्प्लीहोदावर्त्तशूलिनाम्॥ ८॥
हितं वातामयश्वासग्रन्थिवर्त्मविकारिणाम्।
तैलमेरंडजं बल्यं गुरूष्णं मधुरं सरम्॥ ९॥
तीक्ष्णोष्णं पिच्छिलं विस्रं रक्तैरंडोद्भवं भृशम्।
कुसुम्भतैलमुष्णं च विपाके कटुकं गुरु॥ १०॥
विदाहि च विशेषेण सर्वरोगप्रकोपणम्।
सरं कोशाम्रजं तैलं कृमिकुष्ठव्रणापहम्॥ ११॥
दन्तीमूलकरक्षोघ्नकरंजारिष्टशिग्रुजम्।
सौवर्चले[1]ङ्गुदी[2]पीलु[3]शंखिनी[4]नीपसंभवम्॥ १२॥
सरलागुरुदेवाह्वशिंशपासारजन्म च।

---

१. हुरहुरबीजम्, २. इंगुदी, तापसतरुः, करील, ३. पीलुः प्रसिद्धः, ४. जवतिक्ती।

तुवरा[1]रुष्करोत्थं च तीक्ष्णं कंड्वस्रपित्तकृत् ॥ १३ ॥
अर्शःकुष्ठकृमिश्लेष्मशुक्रमेदोऽनिलापहम् ।
करंजारिष्टजे तिक्ते नात्युष्णे तत्र निर्दिशेत ॥ १४ ॥
कषायतिक्तकटुकं सारलं व्रणशोधनम् ।
भृशोष्णे कटुतीक्ष्णे च तुवरारुष्करोद्भवे ॥ १५ ॥
विशेषात् कृमिकुष्ठघ्ने तथोर्ध्वाधोविरेचने ।
अक्षातिमुक्तका[2]क्षोडनालिकेरमधूकजम् ॥ १६ ॥
त्रपुसैर्वारुकूष्माण्डश्लेष्मातक[3]पियालजम् ।
वातपित्तहरं केश्यं श्लेष्मलं गुरु शीतलम् ॥ १७ ॥
पित्तश्लेष्मप्रशमनं श्रीपर्णीकिंशुकोद्भवम् ।
दोषघ्नं दीपनं मेध्यं किंचित्तिक्तं रसायनम् ॥ १८ ॥
यवबिम्बी(तिक्ता)भवं तैलं स्वादु पाके विरेचनम् ।
कफवातहरं रूक्षं कषायं नातिपित्तकृत् ॥ १९ ॥
सतिक्तं सहकारस्य तैलं सुरभि रोचनम् ।
फलोद्भवानि तैलानि यान्युक्तानीह तानि च ॥ २० ॥
गुणान् कर्म च विज्ञाय फलानीव विनिर्दिशेत् ।
यावन्तः स्थावराः स्नेहाः समासात् परिकीर्तिताः ॥ २१ ॥
सर्वे तैलगुणा ज्ञेयाः सर्वे चानिलनाशनाः ।
सर्वेभ्यः स्नेहतैलेभ्यस्तिलतैलं विशिष्यते ॥ २२ ॥
इष्यते तद्गुणत्वाच्च तैलत्वमितरेष्वपि ।
घृतमब्दात् परं पक्वं हीनवीर्यं प्रजायते ॥ २३ ॥
तैलं पक्वमपक्वं वा चिरस्थायि गुणाधिकम् ।

॥ इति तैलवर्गः ॥

---

१. पत्रैस्तु केशराकारैः कलायसदृशैः फलैः ।
वृक्षास्तुवरका नाम पश्चिमार्णवतीरजाः ॥
वीचीतरंगविक्षोभमारुतोद्धूतपल्लवाः ।
तेषां फलान्याददीत सुपक्वान्यंबुदागमे ॥

२. अशोक ।

३. बहुआर ।

११. स्नेहवर्गः

वसा मज्जा च वातघ्नौ बलपित्तकफप्रदौ ।
मांसानुगस्वरूपौ च विद्यान्मेदोऽपि तद्विधम् ॥ १ ॥

चौलूकी[1] शौकरी या च हंसजा कुक्कुटोद्भवा ।
वसा श्रेष्ठा स्ववर्गेषु कुंभीरमकरोद्भवा ॥ २ ॥

मधुरो बृंहणो वृष्यो मज्जा मेदस्तथा वसा ।
यथासत्त्वं तु शैत्यौष्ण्यं वसामज्ज्ञोः विनिर्दिशात् ॥ ३ ॥

काकमद्गुवसा तद्वत् कारंडोष्णा च निन्दिता ।
सुस्वादु मेदसां छागं हास्तिकी च वसावरा ॥

॥ इति स्नेहवर्गः ॥

---

१. चुळुकी तु शिशुमाराकृतिर्मत्स्यविशेषः ।

१२. मद्यवर्गः

दीपनं रोचनं मद्यं तीक्ष्णोष्णं तुष्टिपुष्टिदम् ।
सुस्वादु तिक्तकटुकमम्लपाकरसं सरम् ॥ १ ॥
सकषायं स्वरारोग्यप्रतिभावर्णकृल्लघु ।
नष्टनिद्रातिनिद्रेभ्यो हितं पित्तास्रदूषणम् ॥ २ ॥
कृशस्थूलहितं रूक्षं सूक्ष्मस्रोतोविशोधनम् ।
वातश्लेष्महरं युक्त्या पीतं विषवदन्यथा ॥ ३ ॥
कार्श्यार्शोग्रहणीरोगमूत्राघातानिलापहा ।
स्तन्यरक्तक्षयहिता सुरा बृंहणदीपनी ॥ ४ ॥
कासार्शोग्रहणीदोषप्रतिश्याश्वासनाशिनी ।
स्वेदमूत्रकफस्तन्यरक्तमांसकरी सुरा ॥ ५ ॥
छर्द्यरोचकहृत् कुक्षितोदशूलप्रमर्दनी ।
प्रसन्ना वातगुल्मार्शोविबन्धानाहनाशिनी ॥ ६ ॥
पित्तलाऽल्पकफा रूक्षा यवैर्वातप्रकोपिणी ।
विष्टंभिनी सरा गुर्वी श्लेष्मला तु मधूलिका ॥ ७ ॥
त्रिदोषोद्भेद्यवृष्यश्च कोहलो[1] वदनप्रियः ।
ग्राह्युष्णो जगलः पक्ता रूक्षस्तृट्कफशोफहृत् ॥ ८ ॥
हृद्यः प्रवाहिकाटोपदुर्नामानलशोफहृत् ।
बक्कसो हृतसारत्वाद् विष्टंभी वातकोपनः ॥ ९ ॥
मार्द्वीकं दीपनं हृद्यं नात्युष्णं मधुरं सरम् ।
अल्पपित्तानिलं पाण्डुमेहार्शःक्रिमिनाशनम् ॥ १० ॥
अस्मादल्पान्तरगुणं खार्जूरं वातलं गुरु ।
हृद्यं कषायमधुरं सुगन्धेन्द्रियबोधनम् ॥ ११ ॥
दीपनः सृष्टविण्मूत्रो वल्यः स्वल्पमदो गुरुः ।
कषायो मधुरः सीधुर्गौडः पाचनदीपनः ॥ १२ ॥
शार्करो मधुरो हृद्यो दीपनो बस्तिशोधनः ।
वातघ्नो मधुरः पाके रुच्य इन्द्रियबोधनः ॥ १३ ॥
तद्वत्पक्वरसः सीधुर्बलवर्णकरः सरः ।
शोफघ्नो दीपनो रुच्यो वातश्लेष्मार्शसां हितः ॥ १४ ॥
कर्शनः शीतरसिकः श्वयथूदरनाशनः ।
वर्णकृज्जरणः स्वर्यो विबन्धघ्नोऽर्शसां हितः ॥ १५ ॥
छेदी मध्वासवस्तीक्ष्णो मेहपीनसकासजित् ।
सुरासवस्तीव्रमदः स्वादुस्तीक्ष्णोऽनिलापहः ॥ १६ ॥

---

१. माषसुरा ।

आक्षकः पाण्डुरोगघ्नो बल्यः संग्राहको लघुः।
कषायो मधुरः शीतः पित्तघ्नोऽसृक्प्रसादनः॥ १७॥
जाम्बवो बद्धनिस्यन्दस्तुवरो वातकोपनः।
तीक्ष्णः कषायो मदकृद् दुर्नामकफगुल्मनुत्॥ १८॥
कृमिमेदोऽनिलहरो मैरेयो[1] मधुरो गुरुः।
बल्यः पित्तहरो वर्ण्यो हृद्यश्चेक्षुरसासवः॥ १९॥
सीधुर्मधूकपुष्पोत्थो विदाह्यग्निबलप्रदः।
रूक्षः कषायः कफकृद्वातपित्तप्रकोपणः॥ २०॥
निर्दिशेद् द्रव्यतश्चान्यान् कंदमूलफलासवान्।
अरिष्टो द्रव्यसंयोगात् संस्कारादधिको गुणैः॥ २१॥
बहुदोषहरश्चैव दोषाणां शमनश्च सः।
दीपनः कफवातघ्नः सरः पित्तविशोधनः॥ २२॥
शूलाध्मानोदरप्लीहज्वराजीर्णार्शसां हितः।
अरिष्टासवसीधूनां गुणान् कर्माणि चादिशेत्॥ २३॥
बुद्ध्या यथास्वं संस्कारमवेक्ष्य कुशलो भिषक्।
नवं मद्यमभिष्यन्दि गुरु वातादिकोपनम्॥ २४॥
अनिष्टगंधविरसमहृद्यं च विदाहि च।
सुगंधि दीपनं हृद्यं रोचिष्णु कृमिनाशनम्॥ २५॥
शुद्धमोजस्करं जीर्णं लघु वातक्षयापहम्।
सान्द्रं विदाहि दुर्गन्धि कृमिलं गुरुसंज्ञितम्॥ २६॥
अहृद्यं तरुणं तीक्ष्णमुष्णं दुर्भाजनस्थितम्।
अल्पौषधं पर्युषितमपक्वं पिच्छिलं गुरु॥ २७॥
तद्वर्ज्यं सर्वथा मद्यं किंचित् शेषं च यद् भवेत्।
तत्र यस्तोकसंभारं तरुणं पिच्छिलं गुरु॥ २८॥
कफप्रकोपि तन्मद्यं दुर्जरं च विशेषतः।
पित्तप्रकोपि बहुलं तीक्ष्णमुष्णं विदाहि च॥ २९॥
अहृद्यं फेनवत्पूति कृमिलं विरसं च यद्।
तथा पर्युषितं चापि विद्यादनिलकोपनम्॥ ३०॥
सर्वदोषैरुपेतं तु सर्वदोषप्रकोपणम्।
चिरस्थितं जातरसं दीपनं कफवातजित्।
रुच्यं प्रसन्नं सुरभि मद्यं सेव्यं मदावहम्॥ ३१॥

॥ इति मद्यवर्गः॥

१. मधुगुडाभ्यां संधानम्।

१३. काञ्जिकवर्गः

रक्तपित्तकरं शुक्तं छेदि भुक्तविपाचनम् ।
भेदनं जरणं श्लेष्मपाण्डुकृमिहरं लघु ॥ १ ॥
तीक्ष्णोष्णं मूत्रलं हृद्यं कफजं कटुपाकि च ।
तद्वत्तदासुतं सर्वं रोचनं तु विशेषतः ॥ २ ॥
गौडानि रसशुक्तानि मद्यशुक्तानि यानि च ।
गुडाम्बुना सतैलेन संधानं संस्कृतं च यत् ॥ ३ ॥
कन्दशाकफलैर्युक्तं गुडशुक्तं तदुच्यते ।
जम्बीराणां फलरसं पिप्पलीमूलसंयुतम् ॥ ४ ॥
मधुभाण्डे[1] विनिक्षिप्य धान्यराशौ निधापयेत् ।
दिवसैस्तज्जातरसं मधुशुक्तं[2] तदुच्यते ॥ ५ ॥
यथापूर्वं गुरुतराण्यभिष्यन्दकराणि च ।
दीपनं जरणीयं च हृत्पाण्डुकृमिरोगनुत् ॥ ६ ॥
ग्रहण्यर्शोहितं भेदि सौवीरकतुषोदकम् ।
(ग्रहण्यर्शोविकारघ्नं सौवीरकतुषोदकम् ॥)
दाहज्वरापहं स्पर्शात् पानाद्वातकफापहम् ॥ ७ ॥
विबन्धघ्नमविस्रंसि दीपनं चाम्लकांजिकम् ।
(धान्याम्लं धान्ययोनित्वाद् दीपनं दाहनाशनम् ॥)
तुषांबु दीपनं हृद्यं हृत्पाण्डुक्रिमिरोगनुत् ॥ ८ ॥
तैक्ष्ण्याच्च निर्हरेदाशु कफं गण्डूषधारणात् ।
मुखवैरस्यदौर्गन्ध्यमलशोफकफापहम् ॥ ९ ॥
दीपनं जरणं भेदि हितमास्थापनेषु च ।
समुद्रमाश्रितानां च जनानां हितमुच्यते ॥ १० ॥
काञ्जिकाद्रं सलवणं पाचनं दीपनं लघु ।
वातश्लेष्महरं रुच्यं विशेषादामवातनुत् ॥ ११ ॥

॥ इति कांजिकवर्गः ॥

---

१. मधुभाण्ड इति मधूपर्णभाण्ड इत्यर्थः ।
२. मद्यशुक्तानीति पाठे पंचरसं सर्वमद्यं कालान्तरवशाद्म्लतां यातं मद्यशुक्तमुच्यते । चकारेण धान्ययोनिशुक्तमप्यस्तीति समुच्चीयते ॥

१४. मूत्रवर्गः

मूत्रं गोजाविमहिषीगजाश्वौष्ट्रखरोद्भवम् ।
पित्तलं तीक्ष्णरूक्षोष्णं लवणानुरसं कटु ॥ १ ॥
कृमिशोफोदरानाहशूलपाण्डुकफानिलान् ।
गुल्मारुचिविषश्वित्रकुष्ठार्शांसि जयेल्लघु ॥ २ ॥
गोमूत्रं कटु तीक्ष्णोष्णं सक्षारत्वान्न वातलम् ॥
लघ्वग्निदीपनं मेध्यं पित्तलं कफवातजित् ॥ ३ ॥
शूलगुल्मोदरानाहविरेकास्थापनादिषु ।
मूत्रप्रयोगे सर्वेषु गव्यं मूत्रं प्रयोजयेत् ॥ ४ ॥
कासश्वासापहं शोथकामलापाण्डुरोगनुत् ।
छागं रूक्षोष्णकटुकं नाडीविषगरापहम् ॥ ५ ॥
प्लीहोदरश्वासकासशोथवर्चोग्रहे हितम् ।
सक्षारं तिक्तकटुकमुष्णं वातघ्नमाविकम् ॥ ६ ॥
दुर्नामोदरशूलेषु कुष्ठमेहविशुद्धिषु ।
आनाहशोथगुल्मेषु पाण्डुरोगे च माहिषम् ॥ ७ ॥
सतिक्तलवणं भेदि वातघ्नं पित्तकोपनम् ।
तीक्ष्णं क्षारं किलासे च नागं मूत्रं प्रयोजयेत् ॥ ८ ॥
दीपनं कटु तीक्ष्णोष्णं वातरोगविकारनुत् ।
आश्वं कासहरं रूक्षं कृमिदद्रुविनाशनम् ॥ ९ ॥
औष्ट्रं कुष्ठोदरोन्मादशोफार्शःकृमिवातनुत् ।
गरचेतोविकारघ्नं तीक्ष्णं जठररोगनुत् ॥ १० ॥
दीपनं गार्दभं मूत्रं कृमिवातविषापहम् ।
कषायतिक्तमेतेषां हिध्माश्वासहरं शकृत् ॥ ११ ॥
पित्तरक्तकृमिहरं रोचनं कफवातजित् ।
तिक्तं पामाहरं मूत्रं मानुषं तु विषापहम् ॥ १२ ॥

॥ इति मूत्रवर्गः ॥

१५. तोयवर्गः

पानीयं शीतलं हृद्यं हन्ति पित्तविषभ्रमान्।
दाहाजीर्णश्रमच्छर्दिमदमूर्च्छामदात्ययान् ॥ १ ॥
अर्धावशेषि वातं शृतं त्रिभागं बलासमपहन्ति।
गतचरणं शृतशीतं विनाशयेत् पित्तमुद्भूतम् ॥ २ ॥
गगनाम्बु त्रिदोषघ्नं गृहीतं यत्सुभाजने।
बल्यं रसायनं शीतं पात्रापेक्षि च तत् परम् ॥ ३ ॥
अनार्त्तवं प्रमुञ्चन्ति वारिधारास्तु वारिदाः।
तत्त्रिदोषाय सर्वेषां देहिनां परिकीर्तितम् ॥ ४ ॥
तदेव तु चिरस्थायि वारि स्यादमृतोपमम्।
दिव्यवार्यग्निसंयोगात् संहताः खात् पतन्ति याः ॥ ५ ॥
शिलाप्रकरवच्चापः कारक्यो ह्यमृतोपमाः।
अपि नद्याः समुद्रान्ते वह्निमारुतसंभवाः ॥ ६ ॥
धूमावयवनिर्मुक्ता [1]नीहाराख्यास्तु ताः स्मृताः।
प्राक्समुद्राम्बुसंपर्किसमीरणसमीरिताः ॥ ७ ॥
अपथ्याः प्राणिनां प्रायो भूरुहाणां हितास्तु ताः।
आपोऽवश्यायजा रूक्षा वातला लघुशीतलाः ॥ ८ ॥
दाहासृक्पित्ततृट्छर्दिमेदःश्लेष्मसु पूजिताः।
ऊरुस्तम्भाभिभूतानां जनानामथ कुष्ठिनाम् ॥ ९ ॥
अत्यर्थमगदंकाराः स्पर्शात् पानेन वा नृणाम्।
न रूक्षा न च ताः स्निग्धा हिमजास्त्वतिशीतलाः ॥ १० ॥
कोपयन्ति न ता वायुं वर्धयन्ति कफं न च।
चन्द्रकान्तोद्भवं रूक्षं विषपित्तज्वरापहम् ॥ ११ ॥
नादेयं वातलं रूक्षं दीपनं लघु लेखनम्।
तदभिष्यन्दि मधुरं सान्द्रं गुरु कफावहम् ॥ १२ ॥
तृष्णाघ्नं सारसं[2] बल्यं कषायं मधुरं लघु।
ताडागं[3] वातलं स्वादु कषायं कटुपाकि च ॥ १३ ॥

---

१. अवश्यायस्तु नीहारस्तुषारस्तुहिनं हिमम्। २. सरो दिव्यखातं पुरुषव्यापारं विना कृतम्। ३. तडागं पुरुषव्यापारकृतम्।

वातश्लेष्महरं वाप्यं[1] सक्षारं कटु पित्तलम् ।
चौण्ड्यमग्निकरं रुक्षं मधुरं कफकृन्न च ॥ १४ ॥
कफघ्नं दीपनं पथ्यं लघु प्रस्रवणोद्भवम् ।
सक्षारं पित्तळं कौपं श्लेष्मघ्नं दीपनं लघु ॥ १५ ॥
कौपं[२] स्वादु त्रिदोषघ्नं लघु पथ्यं च सर्वदा ।
मधुरं पित्तशमनमविदाह्यौद्भिदं स्मृतम् ॥ १६ ॥
वैकरं लघु सक्षारं श्लेष्मघ्नं कटु दीपनम् ।
कैदारं दुर्जरं प्रोक्तं विपाके गुरु दोषलम् ॥ १७ ॥
तद्वत्पाल्वलमुद्दिष्टं विशेषाद् दोषळं च तत् ।
सामुद्रमुदकं विस्रं लवणं सर्वदोषकृत् ॥ १८ ॥
नद्यः पाषाणविच्छिन्ना क्षुभिताभिहतोदकाः ।
हिमवत्प्रभवाः पथ्याः पुण्या देवर्षिसेविताः ॥ १९ ॥
नद्यः पाषाणसिकतावाहिन्यो विमलोदकाः ।
मलयप्रभवा याश्च जळं तास्वमृतोपमम् ॥ २० ॥
पश्चिमाभिमुखा याश्च पथ्यास्ता निर्मलोदकाः ।
प्रायो मृदुवहा गुर्व्यो याश्च पूर्वसमुद्रगाः ॥ २१ ॥
पारियात्रभवा याश्च विन्ध्यसह्यभवाश्च याः ।
शिरोहृद्रोगकुष्ठानां हेतवः श्लीपदस्य च ॥ २२ ॥
चन्द्रार्ककरसंस्पृष्टं वायुना स्फालितं मुहुः ।
पर्वतोपरि यद्वारि समं पौरंदरेण तत् ॥ २३ ॥
तस्यानुगुणमुद्दिष्टं शैलप्रस्रवणोद्भवम् ।
लेखनं दीपनं रूक्षं किंचिद्वातप्रकोपणम् ॥ २४ ॥
आनूपदेशे यद्वारि तत्सांद्रं गुरु पिच्छिलम् ।
मधुरं श्लेष्मजननं स्निग्धं पावकसादनम् ॥ २५ ॥
जाड्यान्ध्यगदबाधिर्यसोत्क्लेशारोचकावहम् ।
प्रमेहश्लीपदच्छर्दिगलगण्डास्यरोगकृत् ॥ २६ ॥
विपर्ययं जांगलेन समं साधारणं जलम् ।
निर्गन्धमव्यक्तरसं तृष्णाघ्नं शुचि शीतलम् ॥ २७ ॥
अच्छं लघु च हृद्यं च तोयं गुणवदुच्यते ।
नद्यः शीघ्रवहा लघ्व्यः प्रोक्ता याश्चामलोदकाः ॥ २८ ॥
गुर्व्यः शैवलसंछन्नाः कलुषा मंदगाश्च याः ।

१. वापी इष्टकादिभिर्बद्धा ससोपानतीरा तत्र भवं जलम् । २. इंदार ।

पिच्छिलं क्रिमिलं क्लिन्नं पर्णशैवालकर्दमैः ॥ २९ ॥
विवर्णं विरसं सान्द्रं दुर्गन्धि न हितं जलम् ।
दिवार्ककिरणैर्जुष्टं जुष्टमिन्दुकरैर्निशि ॥ ३० ॥
अद्वेष्यमनभिष्यंदि तत्तुल्यं गगनाम्बुना ।
कफमेदोनिलामघ्नं दीपनं बस्तिशोधनम् ॥ ३१ ॥
श्वासकासज्वरहरं पथ्यमुष्णोदकं सदा ।
अजीर्णं जरयत्याशु मारुतं चापकर्षति ॥ ३२ ॥
भिनत्ति श्लेष्मसंघातं पीतमुष्णोदकं निशि ।
मद्यपानसमुद्भूते रोगे पित्तोत्थिते तथा ॥ ३३ ॥
सन्निपातसमुत्थे च शृतशीतं हितं पयः ।
भुक्तादौ सलिलं पीतं कार्श्यमंदाग्निदोषकृत् ॥ ३४ ॥
मध्येऽग्निदीपनं श्रेष्ठमंते स्थौल्यकफप्रदम् ।
यत्क्वाथ्यमानं निःफेनं निर्वेगं निर्म्मलं जलम् ॥ ३५ ॥
तत्सर्वं दोषशमनं दीपनं पाचनं लघु ।
पश्चिमांभोधिपतिता गोमतीनर्मदादयः ॥ ३६ ॥
पथ्या वातास्रपित्तघ्न्यो बल्याः कण्डूकफापहाः ।
दक्षिणाब्धिगता बल्याः पित्तघ्न्यः कफवातदाः ॥ ३७ ॥
पूर्वाम्भोधिवहा नद्यो मंदगा[१] गुरवो घनाः ।
न पिबेत्क्वथितं तोयं भवेत्पर्युषितं च यत् ॥ ३८ ॥
अम्लीभूतं गुणैर्हीनं न हितं सलिलार्थिनाम् ।
शारदं चार्द्धपादोनं पादहीनं तु हैमनम् ॥ ३९ ॥
शिशिरे च वसन्ते च ग्रीष्मे चार्द्धावशेषितम् ।
विपरीतऋतुं दृष्ट्वा प्रावृषि चाष्टभागिकम् ॥ ४० ॥
यत्क्वाथ्यमानं निर्वेगं निःफेनं निर्म्मलं च यत् ।
अर्द्धावशिष्टं भवति तदुष्णोदकमुच्यते ॥ ४१ ॥
तत्पादहीनं वातघ्नमर्घहीनं च पित्तजित् ।
कफघ्नं पादशेषं तु पानीयं लघु दीपनम् ॥ ४२ ॥
धारापातेन विष्टंभि दुर्जरं पवनाहतम् ।
शृतशीतं त्रिदोषघ्नं बाष्पान्तर्भावि शीतलम् ॥ ४३ ॥
दिवाशृतं तु यत्तोयं रात्रौ तद् गुरुतां व्रजेत् ।
रात्रौ शृतं तु दिवसे गुरुत्वमधिगच्छति ॥ ४४ ॥

---

१. विबोधाद् ।

मूर्च्छापित्तोष्णदाहेषु विषे रक्ते मदात्यये।
भ्रमक्लमपरीतेषु तमके वमथौ तथा॥ ४५॥
ऊर्ध्वगे रक्तपित्ते च शीतमम्भः प्रशस्यते।
पार्श्वशूले प्रतिश्याये वातरोगे गलग्रहे॥ ४६॥
आध्माने स्तिमिते कोष्ठे सद्यःशुद्धे नवज्वरे।
हिक्कायां स्नेहपीते च शीताम्बु परिवर्जयेत्॥ ४७॥
अरोचके प्रतिश्याये प्रसेके श्वयथौ क्षये।
मंदाग्नावुदरे कुष्ठे ज्वरे नेत्रामये तथा॥ ४८॥
व्रणे च मधुमेहे च पानीयं मंदमाचरेत्।
स्निग्धं स्वादु हिमं हृद्यं दीपनं बस्तिशोधनम्॥ ४९॥
वृष्यं पित्तपिपासाघ्नं नालिकेरोदकं गुरु।
तदेव जीर्णं विष्टंभि गुरु पित्तकरं स्मृतम्॥ ५०॥
अजीर्णे भेषजं वारि जीर्णान्ने च बलप्रदम्।
आयुराहारकाले च भुक्तान्नोपरि नो निशि॥ ५१॥

आमं जलं जीर्यति याममात्रं तदर्धमात्रं श्रृतशीतवारि।
तदर्धमात्रं जलमुष्णमेति त्रिधेति चोक्तो जलजीर्णकालः॥ ५२॥

अत्यंबुपानान्न विपच्यतेऽन्नमनंबुपानाच्च स एव दोषः।
तस्मान्नरो वह्निविवर्धनाय मुहुर्मुहुर्वारि पिबेदभूरि॥ ५३॥

अतियोगेन सलिलं तृष्यतोऽपि प्रयोजितम्।
प्रयाति श्लेष्मपित्तत्वं ज्वरितस्य विशेषतः॥ ५४॥
जीवनं जीविनां जीवो जगत्सर्वं च तन्मयम्।
अतोऽत्यन्तनिषेधेन न क्वचिद्वारि वार्यते॥ ५५॥

॥ इति तोयवर्गः॥

---

१६. शालिवर्गः

रक्तशालि[१]स्त्रिदोषघ्नः चक्षुष्यः शुक्रमूत्रलः ।
तृष्णाघ्नो बलकृत् स्वर्यो हृद्यस्तमनु चापरे ॥ १ ॥

शीतो गुरुस्त्रिदोषघ्नो मधुरो गौरषष्टिकः[२] ।
किंचिद्धीनो गुरुस्तस्मादपरो रसपाकतः ॥ २ ॥

महाशालिः[४] परं वृष्यः कलमः[५] श्लेष्मपित्तहा ।
मधुरश्चाम्लपाकश्च व्रीहिः पित्तकरो गुरुः ॥ ३ ॥

---

१. अथात्र धान्यभेदास्त्रिधा भवन्ति

शालयः षष्टिकाः व्रीहयश्च; तत्र शालयो हैमन्ताः,
कण्डितशुक्लतण्डुलाश्चाकण्डितशुक्कतण्डुलाश्च ।
व्रीहयश्च वार्षिका अंशुशब्दवाच्याः ।
इति पंजीकृता व्याख्या ।

तत्र सामान्यगुणास्तावच्छालीनां—मधुरा वीर्यतः शीता लघुपाका बलावहा । पित्तघ्नाल्पानिलकफाः स्निग्धा बद्धामवर्चसः ॥ षष्टिकगुणा यथा—

रसे पाके च मधुराः पित्तानिलहराः स्मृताः ।
शालीनां गुणतश्चापि समाना बद्धवर्चसः ॥

स चायं षष्टिकः सामान्यषष्टिको विशिष्टषष्टिकश्चात्र ज्ञेयः ।

२. शालयो रक्तशालीनां किंचिद्धीनगुणा गुणैः ।

३. विशेषषष्टिकलक्षणं यथा—

शीतः स्निग्धो गुरुः शुक्रयस्त्रिदोषघ्नः स्थिरात्मकः ।
षष्टिकः प्रवरो गौरः कृष्णगौरस्तथानु च ।
शेषास्तुल्योत्तरगुणाः षष्टिकाः क्रमशो गुणैः ॥
लेवेरा इति लोके ।

४. अकंडितशुक्लाः शालयः कंडितशुक्का व्रीहयः ।—कपूरशालि

५. कलमोऽसृक्त्रिदोषघ्नो मधुरः स कषायवान् इत्यन्यत्र ।

अत्युष्णो बह्वभिष्यन्दी[१] पाटलस्तु[२] त्रिदोषकृत् ।
वापितं गुरु तद्धान्यं किंचिद्धीनमवापितम् ॥ ४ ॥
रोपितं तु नवं वृष्यं पुराणं लघु च स्मृतम् ।
दग्धायामवनौ जाताः शालयो लघुपाकिनः ॥ ५ ॥
कषाया बद्धविण्मूत्रा रूक्षाः श्लेष्मापकर्षणाः ।
स्थलजा कफपित्तघ्नाः कषायाः कटुकाश्रयाः ॥ ६ ॥
किंचित्सतिक्तमधुराः पवनानलवर्द्धनाः ।
कैदारा मधुरा वृष्या बल्याः पित्तनिबर्हणाः ॥ ७ ॥
(ईषत्कषायाल्पमला गुरवः कफशुक्रलाः ॥)
रोप्यातिरोप्या लघवः शीघ्रपाका गुणोत्तराः ।
विदाहिनो[३] दोषहरा बल्या मूत्रविवर्द्धनाः ॥ ८ ॥
शालयः छिन्नरूढा ये रूक्षास्ते बद्धवर्चसः ।
तिक्ताः कषायाः पित्तघ्ना लघुपाकाः कफापहा ॥ ९ ॥
विदाहिनो दोषवहाः बल्याः मूत्रविवर्धनाः ।
बहूष्णो बद्धविण्मूत्रो व्रीहिराशुस्त्रिदोषलः ॥ १० ॥
मैरेयो घोटपुच्छश्च दोषत्रयकरो मतः ।
विस्तरेणायमुद्दिष्टः शालिवर्गे हिताहितः[४] ॥ ११ ॥

। इति शालिवर्गः ।

---

१. उदरे गुडगुडाशब्दं कुर्वन् बहु भ्रमणं करोति ।
२. श्वेतरक्तो व्रीहिः ।
३. अविदाहाः (पा०) ।
४. The last two Verses are not found in Ms. 1 .

१७. कुधान्यवर्गः

यावनालः[१] स्वादुशीतो वातलः कफपित्तजित् ।
नीवारः[२] शीतलो ग्राही पित्तघ्नः कफवातकृत् ॥ १ ॥

श्यामाकः शोषणो रूक्षो वातलः श्लेष्मपित्तहा ।
तद्वच्च कंगुनीवारकोरदूषाः प्रकीर्तिताः ॥ २ ॥

रुक्षः शीतो गुरुः स्वादुः सरो विड्वातकृद्यवः ।
वृष्यः स्थैर्यकरो मूत्रमेदःपित्तकफाञ्जयेत् ॥ ३ ॥

पीनसश्वासकासोरुस्तम्भकंठत्वगामयान् ।
न्यूनो यवादपयवो रूक्षोऽम्लो वंशजो यवः ॥ ४ ॥

वृष्यः शीतो गुरुः स्निग्धो जीवनो वातपित्तहा ।
संधानो बृंहणो बल्यो गोधूमः[३] स्थैर्यकृत्परम्[४] ॥ ५ ॥

ईषत्कषायो मधुरः सतिक्तः संग्राहकः पित्तकरस्तथोष्णः ।
तिक्तो विपाके मधुरो बलिष्ठः स्निग्धो व्रणालेपन एव पथ्यः ॥ ६ ॥

बलाग्निमेधाजननोऽल्पमूत्रस्त्वच्योऽथ केश्योऽनिलहा गुरुश्च ।
तिलेषु सर्वेष्वसितः प्रधानो मध्यः सितो हीनतरास्तथाऽन्ये ॥ ७ ॥

॥ इति कुधान्यवर्गः[५] ॥

---

१. जवनरी २. तृणधान्य ३. बृंहद् गोधूम ४. सरः[२] ५. श्यामाकादिवर्गः[२] ।
The first Verse is absent in Ms. 2.

१८. शिम्बिधान्यवर्गः

कृष्णा मुद्गा महामुद्गा गौरा हरितपीतकाः ।
श्वेता रक्ताश्च निर्दिष्टा लघवः पूर्वपूर्वतः ॥ १ ॥

सुश्रुतेन पुनः प्रोक्ताः प्रधाना हरिता गुणैः ।
कफपित्तास्रजिन्मुद्गः कषायो मधुरो लघुः ॥ २ ॥
ग्राही शीतः कटुः पाके चक्षुष्यो नातिवातलः ।
प्रधाना हरिता मुद्गा वन्या मुद्गास्तु मुद्गवत् ॥ ३ ॥
मसूरो मधुरः शीतः संग्राही कफपित्तहा ।
रक्तपित्तज्वरोन्माथी शीतो ग्राही मकुष्ठकः[१] ॥ ४ ॥
कफासृक्पित्तपुंस्त्वघ्नाश्चणका वातला हिमाः ।
वातला रक्तपित्तघ्नाः सतीना भिन्नवर्चसः ॥ ५ ॥
आढकी कफपित्तघ्नी कलायास्त्वतिवातलाः ।
(आढकी कफपित्तघ्नी किंचिन्मारुतकोपनी ॥ ६ ॥

ता एव घृतसंयुक्तास्त्रिदोषशमना मताः)
उष्णः कुलत्थो रसतः कषायः कटुर्विपाके कफमारुतघ्नः ।
शुक्राश्मरीगुल्मनिसूदनश्च संग्राहकः पीनसकासहन्ता ॥ ७ ॥

आनाहमेदोगुदकीलहिक्काश्वासापहः शोणितपित्तकर्त्ता ।
कफस्य हन्ता नयनामयघ्नो विशेषतो वन्यकुलत्थ उक्तः ॥ ८ ॥

स्निग्धोष्णो मधुरो वृष्यो मेदोमांसकफप्रदः ।
वातनुद् बृंहणो बल्यो माषो बहुमलो गुरुः ॥ ९ ॥
राजमाषः सरो रुच्यः कफशुक्राम्लपित्तनुत् ।
सुस्वादुर्वातलो रूक्षः कषायो विशदो गुरुः ॥ १० ॥
गुरूष्णं स्निग्धमधुरं काकाण्डं[२] चात्मगुप्तजम् ।
फलं बल्यं च वृष्यं च बृंहणं वातजित् परम् ॥ ११ ॥
स्निग्धोमा स्वादुतिक्तोष्णा कफपित्तकरी गुरुः ।
दृक्शुक्रहृत्कटुः पाके तद्वद्बीजं कुसुंभजम् ॥ १२ ॥

---

१. मोठ २. अशूकः कपिकच्छूसदृशः शिम्बः काकाण्डः तत्संबंधि फलं काकाण्डम् ।

वातपित्तकरा रूक्षा निष्पावाः[1] श्लेष्मशोषिणः ।
वातघ्नाः कफशुक्रघ्नाः विरूक्षाः स्वादुशीतलाः ॥ १३ ॥
(विष्टंभिन्योऽग्निशमना निर्दिष्टाः शिम्बिजातयः[2] ॥)
कफवातहरस्तीक्ष्णः सिद्धार्थो रक्तपित्तकृत् ।
स्निग्धोष्णः कृमिकुष्ठघ्नः कटुको रसपाकतः ॥ १४ ॥
तद्गुणा राजिका रुच्या तद्गुणोऽन्योऽपि सर्षपः ।
शूकधान्यं[3] शमीधान्यं[4] समातीतं प्रशस्यते ॥ १५ ॥
लघु पथ्यतमं प्रोक्तं गुर्वपथ्यमतो नवम् ।
यद्यदागच्छति क्षिप्रं तत्तल्लघुतरं स्मृतम् ॥ १६ ॥
यवगोधूममाषाश्च तिलाश्चापि नवा हिताः ।
पुराणा विरसा रूक्षा न तथाऽर्थकराः स्मृताः ॥ १७ ॥
अनार्त्तवं व्याधिहतमपर्यागतमेव च ।
अभूमिजं नवं चापि न धान्यं गुणवत्स्मृतम् ॥ १८ ॥
नवं धान्यमभिष्यंदि लघु संवत्सरोषितम् ।
विदाहि गुरु विष्टंभि विरूढं दृष्टिदूषणम् ॥ १९ ॥

॥ इति शिंबिधान्यवर्गः ॥

---

१. निष्पावः शिम्बीसदृशः मालवादिषु प्रसिद्धः । २. श्वेतपीतकृष्णरक्तवर्णभेदेन । ३. शाल्यादि ४. शिंबिधान्यं मुद्गादि ।

१६. मांसवर्गः

द्विधा जांगलमानूपमिति मांसं द्विधा स्मृतम् ।
जाङ्गलं चाष्टधा तत्र हरिणैणकुरंगकाः ॥ १ ॥
ऋश्यशंबरगोकर्णचारुष्कशरभादयः ।
भवन्ति लघवस्तीक्ष्णाः कषाया मधुरा मृगाः ॥ २ ॥
वातपित्तहराः पथ्याः स्मृता बस्तिविशधोनाः ।
सर्वं वातहरं मांसं वृष्यं बल्यतमं गुरु ॥ ३ ॥
तद्रसस्तर्पणो बल्यः पथ्यः प्राणकरो लघुः ।
कषायमधुरो हृद्यः पितासृक्कफवातहा ॥ ४ ॥
संग्राही रोचनो बल्यस्तेषामैणो ज्वरापहः ।
मधुरो मधुरः पाके दोषघ्नोऽनलदीपनः ॥ ५ ॥
शीतलो बद्धविण्मूत्रः सुगन्धिः हरिणो लघुः ।
शोफातीसारपित्तास्रगर्शसां च हितो[1] लघुः ॥ ६ ॥
रूक्षः स्वादुकषायश्च बद्धविट् शीतलः[2] शशः ।
स्निग्धं मृद्वनभिष्यन्दि नात्युष्णं धातुसाम्यकृत् ॥ ७ ॥
मांसमाजं परं बल्यं बृंहणं वातनाशनम् ।
बृंहणं मांसमौरभ्रं पित्तश्लेष्मकरं गुरु[3] ॥ ८ ॥
श्वासकासप्रतिश्यायविषमज्वरनाशनम् ।
श्रमात्यग्निहितं गव्यं पवित्रमनिलापहम् ॥ ९ ॥
मेदःपुच्छोद्भवं वृष्यमौरभ्रसदृशं गुणैः ।
(औरभ्रवत्समगुणं मांसमैकशफोद्भवम् ।)
स्निग्धोष्णं मधुरं वृष्यं माहिषं तर्पणं गुरु ॥ १० ॥
निद्रापुंस्त्वबलस्तन्यवर्द्धनं मांसदार्ढ्यकृत् ।
स्नेहनं बृंहणं वृष्यं श्रमघ्नमनिलापहम् ॥ ११ ॥
वाराहं पिशितं बल्यं स्वेदनं रोचनं गुरु ।
कफघ्नं खड्गिपिशितं कषायमनिलापहम् ॥ १२ ॥
पित्र्यं पवित्रमायुष्यं बद्धमूत्रं विरूक्षणम् ।
संग्राही दीपनः शीतः कषायो मधुरो लघुः ॥ १३ ॥

---

१. सामहितो[1] । २. वतलः[2] । ३. लघुः[3] ।

लावः कटुविपाकश्च सन्निपाते च पूजितः ।
ईषद्गुरूष्णमधुरो वृष्यो मेध्योऽग्निवर्द्धनः ॥ १४ ॥
तित्तिरिः सर्वदोषघ्नो ग्राही वर्णप्रसादनः ।
हिक्काश्वासानिलहरो विशेषाद् गौरतित्तिरिः ॥ १५ ॥
वातपित्तहरा बल्या मेधाग्निबलवर्धनाः ।
लघवः क्रकरा[1] हृद्यास्तथा चैवोपचक्रकाः ॥ १६ ॥
दर्शनश्रोत्रमेधाग्निवयोवर्णस्वरायुषाम् ।
बर्ही हिततमो बल्यो वातघ्नो मांसशुक्रदः ॥ १७ ॥
रक्तपित्तहरः शीतो लघुश्चापि कपिञ्जलः[2] ।
कफोत्थेषु च रोगेषु मंदवाते च शस्यते ॥ १८ ॥
रक्तपित्तहरः शीतो गुरुः पारावतो मतः ।
कषाया मधुराः शीताः रक्तपित्तनिबर्हणाः ॥ १९ ॥
विपाके मधुराश्चैव कपोता गृहवासिनः ।
तेभ्यो लघुतराः किंचित् कपोता वनवासिनः ॥ २० ॥
शीताः संग्राहिणश्चैव स्वल्पमूत्रकराश्च ते ।
किंचिल्लघुतरा रुक्षा ग्राहिणः श्लेष्मपित्तलाः ॥ २१ ॥
हितास्ते पाण्डु[3]चित्रांगा[4] हारीता[5] वनवासिनः ।
स्निग्धोष्णोऽनिलहा वृष्यः स्वेदस्वरबलावहः ॥ २२ ॥
बृंहणः कक्कुटो वन्यस्तद्वद् ग्राम्यो गुरुस्तु सः ।
कुलिंगो मधुरः स्निग्धः कफशुक्रविवर्धनः ॥ २३ ॥
सन्निपातहरो वेश्मकुलिंगो ह्यतिशुक्रलः ।
हंसो वातहरो वृष्यः स्वर्यो मांसबलप्रदः ॥ २४ ॥
सारिकाकाककादम्बबलाकाः पवनापहाः ।
स्निग्धाः सृष्टमला वृष्या रक्तपित्तहरा हिमाः ॥ २५ ॥
कासश्वासक्षयहरी गोधा मधुरशीतला ।
मूषको मधुरः स्निग्धो व्यवायी शुक्रवर्धनः ॥ २६ ॥
दुर्नामानिलदोषघ्नाः कृमिदूषीविषापहाः ।
चक्षुष्या मधुराः पाके सर्पाः मेधाग्निवर्द्धनाः ॥ २७ ॥
दर्वीकरा[6] दीप्यकाश्च तेषूक्ताः कटुपाकिनः ।

---

१. क्रकर आनूपदेशचरो दीर्घजंघः तित्तिरसदृशः क्रकरनाम्नैव प्रसिद्धः । 'कुलंचा इति लोके'[२] उपचक्रः क्रकरभेदः बृह (स्पष्टः न) मंदावि (पये) २. करहुआ ३. पयडुक ४. चितरोषा ५. होरिल ६. फणावंतः गंडवंतः ।

मधुरात्यर्थचक्षुष्याः सृष्टविण्मूत्रमारुताः ॥ २८ ॥
शंखाः[1]कूर्मादयः[2] स्वादुरसपाकबलावहाः ।
शीताः स्निग्धा हिता पित्ते चक्षुष्याः शुक्रवर्धनाः ॥ २९ ॥
कृष्णकर्कटकस्तेषां बल्यः कोष्णोऽनिलापहः ।
शुक्रयःसंधानकृत्सृष्टविण्मूत्रोऽनिलपित्तहा ॥ ३० ॥
सर्वेषां प्राणिनां देहे मध्यो गुरुरुदाहृतः ।
पूर्वभागो गुरुः पुंसां मध्यो भागस्तु योषिताम् ॥ ३१ ॥
ऊरुग्रीवं विहंगानां विशेषेण गुरुस्तथा ।
अतीव मांसं रूक्षं तु विहगानां फलाशिनाम् ॥ ३२ ॥
बृंहणं मांसमत्यर्थं खगानां पिशिताशिनाम् ।
मत्स्याशिनां च पित्तघ्नं वातघ्नं धान्यचारिणाम् ॥ ३३ ॥
ये मृगा विहगास्तोयाद् दूरस्थवनचारकाः ।
तेऽनभिष्यन्दिनः सर्वे विपरीतास्ततोऽन्यथा ॥ ३४ ॥
बिलेशया वातहरा बृंहणा रसपाकयोः ।
मधुरा बद्धविण्मूत्रा वीर्योष्णाश्च प्रकीर्तिताः ॥ ३५ ॥
कृशमांसं परं भेदि स्वयंमृतमपौष्टिकम् ।
विषघातमृतान्मृत्युः लालाछर्दिःप्रवर्धनम् ॥ ३६ ॥
वायुपूर्णसिराजालं मृतमप्सु त्रिदोषकृत् ।
धूमरुद्धमवृष्यं हि दुर्गन्धं चाप्यपौष्टिकम् ॥ ३७ ॥
प्रक्लिन्नं व्याधिशुष्कं च शूलव्याधिकरं गुरु ।
विपरीतमतः पथ्यं तुष्टिपुष्टिबलावहम्[3] ॥ ३८ ॥
दूरे जनान्तनिलयाद् दूरे पानीयगोचराः ।
ये मृगाश्च विहंगाश्च तेऽल्पाभिष्यंदिनो मताः ॥ ३९ ॥
अतीवासन्ननिलयाः समीपोदकगोचराः ।
ये मृगाश्च विहंगाश्च महाभिष्यंदिनो मताः ॥ ४० ॥

॥ इति मांसवर्गः ॥

---

१. शखशंबूकशुक्तिप्रभृतयः । २. कच्छपकर्कटशिशुमारप्रभृतयः ।
३. हारीतात् ।

The chaprer ends after Verse 30 in Ms. 2.

२०. मत्स्यवर्गः

निग्धोष्णाः स्वादुगुरवः सृष्टविण्मूत्रमारुताः ।
महाभिष्यन्दिनो वृष्या बल्या वातहराः परम्[१] ॥ १ ॥
कफपित्तकरा मत्स्या बलोपचयवर्द्धनाः ।
व्यायामाध्वरतानां च दीप्ताग्नीनां[२] च पूजिताः ॥ २ ॥
कषायानुरसः स्वादुर्वातघ्नो नातिपित्तकृत् ।
रोहितः सर्वमत्स्यानां वरो वृष्योऽर्दितार्तिषु ॥ ३ ॥
कषायमधुरो रूक्षो विशदो रोचनो लघुः ।
ग्राही तु नंदिकावर्त्तस्तस्यानु शकुलः स्मृतः ॥ ४ ॥
मत्स्याः स्निग्धाश्च वृष्याश्च बहुदोषाश्च कीर्त्तिताः ।
श्रृंगी मद्गुरुशंकू च[३] गोमत्स्यालित्रिकंटकाः ॥ ५ ॥
कंटकैः सविषा ज्ञेया लक्ष्यमाणास्तु निर्विषाः ।
श्रृंगी तु वातशमनी स्निग्धा श्लेष्मप्रकोपिनी ॥ ६ ॥
विपाके मधुरो वृष्यो वातघ्नो मद्गुरो गुरुः ।
कृष्णमत्स्यो गुरुः स्निग्धो वातजित् श्लेष्मकोपनः ॥ ७ ॥
शकुलाः सकषायाश्च ग्राहिणो मधुरा हिमाः ।
अलिमत्स्यो गुरुः स्निग्धः कषायो रूक्ष एव च ॥ ८ ॥
गुरुमत्स्यो गुरुः स्निग्धः श्लेष्मलो वातनाशनः ।
हिलिसा[४] मधुरः स्निग्धः पित्तहृत् श्लेष्मकोपनः ॥ ९ ॥
नृणां व्यायामनित्यानां[५] हितो वह्निविवर्धनः ।
चडंगः स्निग्धमधुरो गुरुर्विष्टंभिशीतलः ॥ १० ॥
लघवः क्षुद्रमत्स्याश्च ग्राहिणो ग्रहणीहिताः ।
मत्स्यकूर्मखगाण्डानि स्वादुवाजीकराणि च ॥ ११ ॥
महाप्रमाणाः गुरवः क्रियावन्तोऽल्पचेष्टिताः ।
युवत्यः स्थविरा ये स्युः स्त्रियश्च पुरुषाश्च ये ॥ १२ ॥
मृदुभ्यः स्थिरगात्राश्च खेचरेभ्योऽपि भूचराः ।
गुरुरूक्षाः बहुभुजो ये चोपचितमेदसः ॥ १३ ॥
एकदेहेऽपि पूर्वार्द्धं मृगाणां पक्षिणां परम् ।
सर्वेषां च शिरस्कंधप्लीहचर्मयकृद्गुदम् ॥ १४ ॥
पादपुच्छांत्रमस्तिष्कमुष्कक्रोडाः समेहनाः ।
धातवः शोणिताद्याश्च गुरवस्तूत्तरोत्तराः ॥ १५ ॥
। इति मत्स्यवर्गः ॥

---

१. इति चरके । २. कामुकानां[२] । ३. संकुंचौ[२] । ४. इहिलसो । ५. व्यवायनित्यानां[२] ।

२१. फलवर्गः

अम्लं कषामधुरं वातघ्नं ग्राहि दीपनम् ।
स्निग्धोष्णं दाडिमं हृद्यं कफपित्ताविरोधि च ॥ १ ॥
द्विविधं तत्तु विज्ञेयं मधुरं चाम्लमेव च ।
त्रिदोषघ्नं तु मधुरमम्लं वातकफापहम् ॥ २ ॥
क्षीरिवृक्षफलं[१] शीतं स्निग्धं गुरु बलप्रदम् ।
तृष्णामूर्च्छामदभ्रान्तिक्षयदोषत्रयास्रजित् ॥ ३ ॥
परूषकं[२] कषायाम्लमामं पित्तकरं लघु ।
पक्वं तु मधुरं पाके शीतं विष्टंभि बृंहणम् ॥ ४ ॥
हृद्यं तृट्पित्तदाहास्रक्षतक्षयसमीरजित् ।
(वातघ्नं पित्तजननमामं विद्यात् परूषकम् ।
तदेव पक्वं मधुरं वातपित्तनिबर्हणम् ॥)
तिंदुको[३] व्रणवातघ्नस्तत्सारः श्वित्ररोगजित् ॥ ५ ॥
कषायं तिन्दुकं स्वादु गुरु पित्तकफापहम् ।
आममस्य फलं ग्राहि वातलं शीतलं लघु ॥ ६ ॥
पक्वं पित्तप्रमेहास्रश्लेष्मघ्नं विशदं गुरु ।
विषतिन्दुकमप्येवं विशेषाद्ग्राहि शीतलम् ॥ ७ ॥
जम्बूः संग्राहिणी रूक्षा कफपित्तव्रणास्रजित् ।
जाम्बवं[४] वातलं रूक्षं ग्राहि पित्तकफापहम् ॥ ८ ॥
राजजम्बूफलं स्वादु विष्टंभि गुरु रोचनम् ।
क्षुद्रजम्बूफलं तद्वद् विशेषात् दाहनाशनम् ॥ ९ ॥
नीपं शतालुकं पीलु तृणशून्यं[५] विकंकतम्[६] ।
प्राचीनामलकं[७] चैव दोषघ्नं गरघाति च ॥ १० ॥
कर्कन्धूकोलबदर[८]मम्लं वातकफापहम् ।
पक्वं पित्तानिलहरं स्निग्धं समधुरं[९] सरम् ॥ ११ ॥

---

१. खिरिनी, २. फरुसा, ३. तेंदू, ४. जांबू, ५. मल्लिकाफलं केतकीफलमित्यन्ये । ६. वृक्षकटाइ ७. फलं प्राचीनामलकं पनिवराफलम् । ८. कर्कन्धुर्वृक्षबदरीफलम् ; कोलं घोण्टा बदरी; बदरं मरुदेशजं मुष्टिप्रमाणफलम् ; अपक्वं वातकफहरम् । मधुरसं मध्यप्रमाणमिति चन्द्रिका[१] ।

पुराणं तृट्प्रशमनं श्रमघ्नं लघु दीपनम् ।
पित्तमारुतकृद्बालं पित्तलं लघु दीपनम् ॥ १२ ॥
हृद्यं वर्णकरं रुच्यं मांसशुक्रबलप्रदम् ।
पित्ताविरोधि वातघ्नं पक्वमाम्रं सरं गुरु ॥ १३ ॥
वातपित्तहरं रुच्यं बृंहणं बलवर्द्धनम् ।
वृष्यं वर्णकरं स्वादु दुग्धाम्रं गुरु शीतलम् ॥ १४ ॥
शुष्काम्रं सकषायाम्लं भेदनं कफवातजित् ।
मधुरं बृंहणं बल्यमाम्रातं तर्पणं गुरु ॥ १५ ॥
स्नेहनं श्लेष्मलं शीतं वृष्यं विष्टभ्य जीर्यति ।
पनसं[१] शीतलं पक्वं स्निग्धं पित्तानिलापहम् ॥ १६ ॥
बल्यं शुक्रप्रदं हन्ति रक्तपित्तक्षतक्षयान् ।
आमं तदेव विष्टंभि वातलं तुवरं गुरु ॥ १७ ॥
(वातलं गुरु विष्टंभि शीतलं रक्तपित्तनुत् ।
अपक्वं पनसं विद्यात् कषायं मधुरं तथा ॥
तदेव गुरु संपक्वं वातपित्तनिबर्हणम् ।
मधुरं शीतलं शस्यं बृंहणं बलमांसकृत् ॥)
खर्बूजं[२] मूत्रलं बल्यं कोष्ठशुद्धिकरं गुरु ।
स्निग्धं स्वादुतरं शीतं वृष्यं पित्तानिलापहम् ॥ १८ ॥
गुरु विष्टंभि लकुचं[३] त्रिदोषं शुक्रदूषणम् ।
अम्लं तृष्णापहं रुच्यं पित्तकृत् करमर्दकम् ॥ १९ ॥
वातापहं तिन्तिडीकमामं पित्तबलासकृत् ।
ग्राह्युष्णं दीपनं रूक्षं सुपक्वं कफवातनुत् ॥ २० ॥
(तस्मादल्पान्तरगुणं कोशाम्रफलमुच्यते)
अम्लीकायाः फलं पक्वं तद्वद्भेदि तु केवलम् ।
[४]अम्लीकामा गुरुर्वातहरा पित्तकफास्रकृत् ॥ २१ ॥
पक्वा तद्वत्सरा रुच्या वह्निवस्तिविशुद्धिकृत् ।
शुष्का हृद्या श्रमभ्रान्तितृष्णाक्लमहरा लघुः ॥ २२ ॥
ऐरावतं[५] दंतशठमम्लं शोणितपित्तकृत् ।
सुगन्धि मधुरं चाम्लं विशदं भक्तरोचनम् ॥ २३ ॥
दुर्जरं वातशमनं नारंगस्य फलं गुरु ।
नारंगमम्लमत्युष्णं रुच्यं वातहरं सरम् ॥ २४ ॥

---

१. कटहर, २. खरबूजा, ३. बड़हर, ४. अंबिली, ५. नागकेशरफलम् ।

स्वाद्वम्लमपरं हृद्यं दुर्जरं वातनाशनम् ।
अम्लवेतसमत्यम्लं वातघ्नं लघु दीपनम् ॥ २५ ॥
(अम्लवेतसमत्यम्लं तीक्ष्णं स्निग्धं च दीपनम्)
हृद्रोगशूलगुल्मघ्नं पित्तास्रकफदूषणम् ।
श्वासकासापहं रुच्यं तृष्णाहृत्कण्ठशोधनम् ॥ २६ ॥
लघ्वम्लं दीपनं हृद्यं मातुलुंगमुदाहृतम् ।
त्वक् तिक्ता दुर्जरा तस्य वातकृमिविषापहा ॥ २७ ॥
स्वादु शीतं गुरु स्निग्धं मांसमारुतपित्तजित् ।
मेध्यं शूलानिलच्छर्दिकफारोचकनाशनम् ॥ २८ ॥
दीपनं लघु संग्राहि गुल्मार्शोघ्नं तु केशरम् ।
शूलाजीर्णविबन्धेषु मंदेऽग्नौ कफमारुते ॥ २९ ॥
अरुचिश्वासकासेषु रसस्तस्योपदिश्यते ।
मधुकर्कटिका[१] शीता रक्तपित्तहरा गुरुः ॥ ३० ॥
[२]जंबीरमम्लं शूलघ्नं गुरूष्णं कफवातजित् ।
आस्यवैरस्यहृत्पीडावह्निमांद्यकृमीन् जयेत् ॥ ३१ ॥
निबूंकमम्लं वातघ्नं पाचनं दीपनं लघु ।
राजनिम्बूफलं स्वादु गुरु पित्तसमीरजित् ॥ ३२ ॥
कर्मरगं[३] हिमं स्वादु चाम्लं सकफवातजित् ।
तृष्णाशूलकफोत्क्लेशच्छर्दिश्वासनिवारणम् ।
वातश्लेष्मविबन्धघ्नं जम्बीरं गुरु पित्तकृत् ॥ ३२ ॥
कफपित्तहरं हृद्यं सुगन्धि लवलीफलम्[४] ॥ ३४ ॥
वातलं कफपित्तघ्नं विद्यात् पर्प्पटकीफलम् ।
मृद्वीका मधुरा स्निग्धा शीता वृष्यानुलोमनी ॥ ३५ ॥
रक्तपित्तज्वरश्वासतृष्णादाहक्षयापहा ।
द्राक्षा गोस्तनिका तद्वद् गुर्वी वृष्यतमा मता ॥ ३६ ॥
आमास्तु सर्वाः द्राक्षाः स्युः पित्तश्लेष्मप्रकोपणाः ।
करुणं कफवातामदोषघ्नं कफपित्तनुत् ॥ ३७ ॥
द्राक्षाकरीरकर्कन्धुबदराण्यारुकाणि च ।
परूषकाणि चाम्लानि कफपित्तकराणि च ॥ ३८ ॥
स्वादुपाकानि यान्येषां तानि पित्तहराणि च ।
बृंहणीयमहृद्यं च मधूककुसुमं गुरु ॥ ३९ ॥

---

१. मधुकांकारि, २. जंबीरी, ३. कमरक ४. हरपारेवड़ी ।

वातपित्तोपशमनं फलं तस्योपदिश्यते।
कषायं मधुरं पाके वातलं[1]गुरु शीतलम्॥ ४०॥

कपित्थमामं कंठघ्नं विषघ्नं[2] ग्राहि वातलम्[3]।
मधुराम्लकषायञ्च सौगन्ध्याच्च रुचिप्रदम्॥ ४१॥
तदेव पक्वं दोषघ्नं विशदं ग्राहि गुर्वपि।
संग्राहि तद् रुचिकरं रूक्षं पित्तकफापहम्॥ ४२॥

कशेरुकं[4]हिमं स्वादु गुरु पित्तास्रवातजित्।
ग्राहि शुक्रानिलश्लेष्मप्रदं शृंगाटकं[5] तथा॥ ४३॥
गृंजनः पित्तलो ग्राही तीक्ष्णोष्णो रोगनाशनः।
गंधाकृतिरसैस्तुल्यः सूक्ष्मनालः पलाण्डुना॥ ४४॥
क्षतक्षयापहं हृद्यं बृंहणं तर्पणं गुरु।
स्निग्धं वृष्यं समधुरं खार्जूरं रक्तपित्तजित्॥ ४५॥

तस्मादल्पगुणं ज्ञेयमन्यत् खर्जूरिकाफलम्[6]।
शिलेमानी[7] श्रमभ्रांतिदाहमूर्च्छास्रपित्तनुत्॥ ४६॥
चारः पित्तकफास्रघ्नस्तत्फलं मधुरं गुरु।
स्निग्धं सरं मरुत्पित्तवह्नितृष्णाक्षतापहम्॥ ४७॥
(वातपित्तापहं रुच्यं पियालं गुरु शीतलम्॥)
वातहा बृंहणो वृष्यः कुष्ठहा क्रिमिनाशनः।
रक्तपित्तहरः स्वादुस्तालः सप्तगुणः स्मृतः॥ ४८॥

तद्बीजं स्वादुपाकं तु तन्मूलं[8] वातपित्तनुत्।
नालिकेरं गुरु स्निग्धं पित्तघ्नं स्वादु शीतलम्॥ ४९॥
बलमांसप्रदं हृद्यं बृंहणं बस्तिशोधनम्।
वातहृद् गुरु विष्टम्भि शीतलं रक्तपित्तनुत्॥ ५०॥
मोचं स्वादुरसं प्रोक्तं कषायं नातिशीतलम्।
रक्तपित्तहरं वृष्यं रुच्यं श्लेष्मकरं गुरु॥ ५१॥

कदल्या[9] मधुरं शीतं विष्टंभि कफकृद्गुरु।
स्निग्धं पित्तास्रतृट्दाहक्षतक्षयसमीरजित्॥ ५२॥

श्लेष्मलं मधुरं वृष्यं[10] श्लेष्मातकफलं गुरु।
मधुरं सकषायं च स्निग्धं संग्राहि बाकुलम्॥ ५३॥

---

१. श्लेष्मलं[२] २. विशदं[१] ३. शीतलम्[१] ४. कसेरु ५. सिंघार ६. खर्जुरि ७. सिलेमानी ८. मूत्रलं[२] ९. केरा १०. शीतं[१]।

स्थिरीकरं च दन्तानां विशदं फलमिष्यते।
विपाके[१] मधुरं शीतं रक्तपित्तप्रसादनम्॥ ५४॥
पौष्करं स्वादु विष्टंभि बल्यं कफहरं फलम्।
हृद्यं मूत्रविबन्धजं पित्तासृग्वातनाशनम्॥ ५५॥
केश्यं रसायनं मेध्यं काश्मर्यं फलमुच्यते।
मधुराण्यवपाकीनि श्लेष्मपित्तहराणि च॥ ५६॥
अश्वत्थोदुम्बरप्लक्षन्यग्रोधानां फलानि च।
कषायमधुराम्लानि वातलानि गुरूणि च॥ ५७॥
औदुम्बरं फलं ग्राहि वातपित्तनिबर्हणम्।
पियालमज्जा मधुरो वृष्यः पित्तानिलापहः॥ ५८॥
वैभीतको मदकरः कफमारुतनाशनः।
कषायमधुरो मज्जा कोलानां पित्तनाशनः॥ ५९॥
तृषणाच्छर्द्यनिलघ्नश्च तद्वदामलकस्य च।
बीजपूरकशम्पाकमज्जा कोशाम्रसम्भवः॥ ६०॥
स्वादुपाकोऽग्निबलदः स्निग्धः पित्तानिलापहः।
तूतं गुरु हिमं पक्वं स्वादु पित्तानिलापहम्॥ ६१॥
अमृतं गुरु वातघ्नं स्वाद्वम्लं रुचिशुक्रकृत्।
अंजीरं[२] शीतलं स्वादु गुरु पित्तास्रवातजित्॥ ६२॥
तस्मादल्पगुणं ज्ञेयमंजीरं लघु तद्गुणैः।
अक्षोडं[३] मधुरं बल्यं गुरूष्णं वातहृत् सरम्॥ ६३॥
अल्लूकं[४] रसतः शीतं स्वाद्वम्लं वातपित्तकृत्।
वातामसुष्णं सुस्निग्धं वातघ्नं बलशुक्रकृत्॥ ६४॥
यस्य यस्य फलस्येह वीर्यं भवति यादृशम्।
तस्य तस्यैव वीर्येण मज्जानमपि निर्दिशेत्॥ ६५॥
फलेषु परिपक्वं च यद्गुणं तदुदाहृतम्।
बिल्वादन्यत्र विज्ञेयमामं तद्धि गुणोत्तरम्॥ ६६॥
व्याधितं क्रिमिजुष्टं च पाकातीतमकालजम्।
वर्जनीयं फलं सर्वमपर्यागतमेव च॥ ६७॥

॥ इति फलवर्गः ॥

---

१. श्लेष्मलं[२] २. अंजीर ३. अखरोट ४. अल्लू।

२२. शाकवर्गः

पत्रं[1] पुष्पं फलं नालं कंदं संस्वेदजं तथा।
षड्विधं शाकमुद्दिष्टं गुरु विद्याद् यथोत्तरम् ॥ १ ॥
प्रायः सर्वाणि शाकानि विष्टंभीनि गुरूणि च।
रूक्षाणि बहुवर्चांसि सृष्टविण्मारुतानि च ॥ २ ॥
चक्षुष्या सर्वदोषघ्नी जीवन्ती मधुरा हिमा।
स्वादुपाकमसृक्पित्तविषनुत् तण्डुलीयकम् ॥ ३ ॥
लघुर्विपाके कृमिहा मेधाग्निबलवर्धनः।
सक्षारः सर्वदोषघ्नो वास्तूको रोचनः सरः ॥ ४ ॥
चिल्ली वास्तूकवज्ज्ञेया पालंक्या तंडुलीयवत्।
वातकृद्बद्धविण्मूत्रा रूक्षा पित्तकफापहा ॥ ५ ॥
मधुरः कफवातघ्नः पाचनः कंठशोधनः।
विशेषतः पित्तहरः सतिक्तः कासमर्दकः ॥ ६ ॥
त्रिदोषशमनी वृष्या काकमाची रसायनी।
वलीपलितविध्वंसि भेषजं तद्रसायनम् ॥ ७ ॥
नात्युष्णशीता स्वर्या च भेदनी कुष्ठनाशिनी।
काकजंघा विषं हंति रक्तपित्तभ्रमज्वरान् ॥ ८ ॥
पथ्या सरा त्रिदोषघ्नी मेथिका वातनाशिनी।
ईषत्तिक्तं त्रिदोषघ्नं शाकं कटु सतीनकम् ॥ ९ ॥
स्वादुपाकरसं शाकं दुर्जरं हरिसंथजम्[2]।
भेदनं रूक्षमधुरं कलायमतिवातलम् ॥ १० ॥
राजक्षवकशाकं तु त्रिदोषशमनं लघु।
ग्राहि शस्तं विशेषेण ग्रहण्यर्शोविकारिणाम् ॥ ११ ॥
कषायानु हिता पित्ते स्वादुतिक्तरसा हिमा।
लघ्वी मण्डूकपर्णी च तद्वद् गोजिह्विका मता ॥ १२ ॥
अविदाही त्रिदोषघ्नः संग्राही सुनिषण्णकः।
ग्रहण्यर्शोविकारघ्नी चाम्ला वातकफे हिता ॥ १३ ॥

---

१. पत्रशाकं कासमर्दादि, पुष्पशाकं आम्रातकादिमुकुलम्, फलशाकं पटोलादि, नालशाक सर्षपराजिकादि, कन्दशाकं सूरणादि, संस्वेदजं छत्रकादि।

२. छोला।

उष्णा कषायमधुरा चांगेरी चाग्निदीपनी ।
रक्तपित्तानिलहरं सतिक्तं कंचटं मतम् ॥ १४ ॥
संग्राहकं वातकरं मौदकं तत्प्रकीर्तितम् ।
कफापहं शाकमुक्तं वरुणप्रपुनाटयोः ॥ १५ ॥
रूक्षं लघु च शीतं च वातपित्तप्रकोपणम्[1] ।
वत्सादनी बिल्वपत्रं श्रेयसी तिलपर्ण्यपि ॥ १६ ॥
गंडीरश्चित्रकश्चेति शस्यते कफमारुते ।
कालशाकं गरश्लेष्मशोथघ्नं दीपनं कटु[2] ॥ १७ ॥
वर्षाभ्वौ कफवातघ्नौ हितौ शोथोदरार्शसाम् ।
दीपनाः कफवातघ्नाश्चिरबिल्वांकुराः सराः ॥ १८ ॥
वातपित्तकरा रूक्षाः कटुका रसपाकतः ।
वेणोः करीराः श्लेष्मघ्नाः सकषाया विदाहिनः ॥ १९ ॥
तथा नालांकुराश्चान्ये श्लेष्मपित्तहराः स्मृताः ।
आटरूषकवेत्राग्रगुडूचीनिम्बपर्पटाः ॥ २० ॥
किराततिक्तसहिताः सर्वे[3] पित्तकफापहाः ।
कालिंगं ग्राहि दृक्पित्तशुक्रहृच्छीतलं गुरु ॥ २१ ॥
पक्वं तु सोष्णं सक्षारं पित्तलं कफवातजित्[4] ।
अपरः श्वेतवृन्ताकः[5] कुंकुटाण्डफलोपमः ॥ २२ ॥
तस्माद्धीनगुणः किंचिदर्शसां च हितः स्मृतः[6] ।
वार्ताकं कटु तीक्ष्णोष्णं मधुरं कफवातजित् ॥ २३ ॥
सक्षारमग्निजननं हृद्यं रुच्यमपित्तलम् ।
तद्बालं कफपित्तघ्नं पक्वं सक्षारपित्तलम् ॥ २४ ॥
तद्वदेव तु संशुष्कं कफवातामयापहम् ।
कफमेदोनिलहरमत्यर्थं लघु दीपनम् ॥ २५ ॥
वार्ताकं पित्तलं किंचिदंगारपरिपाचितम् ।
तदेव तु गुरु स्निग्धं सतैललवणान्वितम् ॥ २६ ॥
अग्निप्रदा मारुतनाशनी च शुक्रप्रदा शोणितवर्धनी च ।
बलासकासक्षयनाशनी च वार्ताकिरेषां गुणसम्प्रयुक्ता ॥ २७ ॥

---

१. This verse is absent in Ms. 1. २. लघु[1], ३. रक्त[2], ४. Verse absent in Ms. 2 and 3: ५. श्वेत भाटा, ६. Verse Absent in Ms. 2 and 3.

कण्डूकुष्ठक्रिमिघ्नानि कफपित्तहराणि च।
फलानि बृहतीनां तु कटुतिक्तलघूनि च ॥ २८ ॥
पटोलपत्रं पित्तघ्नं नालं तस्य कफापहम्।
फलं त्रिदोषशमनं मूलं तस्य विरेचनम् ॥ २९ ॥
रोचनं कफपित्तघ्नमवृष्यं कारवेल्लकम्।
कारवेल्लकवद्ज्ञेयं फलं कर्कोटकस्य च ॥ ३० ॥
हस्तिकर्कोटकं तद्वद् गुणैस्तत्तु बृहत्फलम्।
विषघ्नं वंध्यकर्कोटं केवुकं कफपित्तजित् ॥ ३१ ॥
चिचिण्डो वेश्मकोलोऽन्यः श्वेतनाडिर्बृहत्फलः।
किंचिन्न्यूनगुणस्तस्माद् विशेषात् शोषणोऽहितः ॥ ३२ ॥
कर्कटी शीतला रूक्षा ग्राहिणी मधुरा गुरुः।
रुच्या पित्तहरा सामा पक्वोष्णा पित्तवह्निकृत् ॥ ३३ ॥
विड्भेदि-मधुरा स्निग्धा प्रायो विष्टम्भि-वातला।
कफापहा शीततरा रुच्या गृहपटोलिका ॥ ३४ ॥
कूष्मांडतुम्बकालिंगकर्कोटैर्वारुडिंडिसम्।
तथा त्रपुसबीजं तु रुचिद[1]कफवातजित् ॥ ३५ ॥
भेदि विष्टंभ्यभिष्यन्दि स्वादु पाकरसं गुरु।
पित्तनुत्तेषु कूष्मांडं बालं मध्यं कफापहम ॥ ३६ ॥
वर्चोभेदीन्यलाबूनि रूक्षशीतगुरूणि च।
कटुतुम्बी हिमा हृद्या पित्तकासविषापहा ॥ ३७ ॥
त्रपुसैर्वारुकं स्वादु[2] गुरु विष्टंभि शीतलम्।
मुखप्रियं च रूक्षं च मूत्रलं त्रपुसं त्वति ॥ ३८ ॥
बालं सनीलं त्रपुसं तेषां पित्तहरं स्मृतम्।
तत्पाण्डु कफकृज्जीर्णमम्लं वातकफापहम् ॥ ३९ ॥
एर्वारुकं तु संपक्वं दाहतृष्णाक्लमार्त्तिनुत्।
सक्षारं पित्तलं[3] तेषु शीर्णवृन्तं कफापहम् ॥ ४० ॥
भेदनं दीपनं हृद्यमानाहाष्ठीलनुल्लघु।
शीर्णवृन्तं लघु स्वादु भेद्युक्तं वह्निपित्तकृत् ॥ ४१ ॥
सक्षारमधुरा रुच्या वातपित्तकफापहा।
अश्मरी भेदनी गुर्वी नाडी कूष्माण्डसंभवा ॥ ४२ ॥

---

१. त्रपुसबीनाडचिर्भटं २. त्रपुसैर्वारुककारु, ३. मधुरं।

अलाबुनालिका गुर्वी मधुरा पित्तनाशिनी[१] ।
वातश्लेष्मकरी रूक्षा शीतला मलभेदनी ॥ ४३ ॥
स्वादुपाकरसा वृष्या रक्तपित्तमदापहा ।
उपोदिका[२] सरा स्निग्धा बल्या श्लेष्मकरा हिमा ॥ ४४ ॥
आरुकस्य च सक्षारं शाकं श्लेष्मकरं गुरु ।
कोशातकी[३] लघुस्तिक्ता रूक्षामाशयशोधिनी ॥ ४५ ॥
शोफपाण्डूदरप्लीहकुष्ठार्शः-कफपित्तजित् ।
तत्फलं भेदनं शीतं लघु मेदस्त्रिदोषजित् ॥ ४६ ॥
राजकोशातकी[४] शीता ज्वरघ्नी कफवातला ।
महाकोशातकी[५] स्निग्धा सरा पित्तानिलापहा ॥ ४७ ॥
कालशिम्बिः[६] समीरघ्नी गुर्व्युष्णा कफपित्तकृत् ।
शिम्बिः[७] शीता गुरुर्बल्या श्लेष्मला वातपित्तजित् ॥ ४८ ॥
डिंडिसो[८] वातलो रूक्षो मूत्रलोऽश्मरीभेदनः ।
डोडिका[९] कफपित्तार्शः-क्रिमिगुल्मविषापहः ॥ ४९ ॥
स्वभावपिच्छिलः शीतो विष्टम्भी वातकोपनः ।
रक्तपित्तहरः स्वादुर्नाडीचः परिकीर्त्तितः ॥ ५० ॥
मारुषो[१०] मधुरः शीतो विष्टंभी पित्तनुद् गुरुः ।
(मारिषो रोचकः शीतो गुरुर्मदस्त्रिदोषजित् ।)
रक्तनालादयश्चान्ये तज्जातीयाश्च तद्गुणाः ॥ ५१ ॥
स्तन्या वृष्या च गुर्वी च सकषाया कलंबुका ।
भेदनी कफपित्तघ्नी कुष्ठघ्नी हिलमोचिका[११] ॥ ५२ ॥
कफपित्तहरी ब्राह्मी मेधास्वरकरी सरा ।
कफपित्तहरस्तिक्तो रोचनो ग्रीष्मसुन्दरः ॥ ५३ ॥
कटुतिक्ता सरा हृद्या रोचनी वह्निदीपनी ।
सर्वदोषहरी लघ्वी कंठ्या मूलकपोतिका ॥ ५४ ॥
मूलकं गुरु विष्टंभि तीक्ष्णमामं त्रिदोषकृत् ।
स्नेहसिद्धं तदेव स्याद् दोत्रयविनाशनम् ॥ ५५ ॥

---

१. तिक्ता गुर्वी समधुरा हिमा[१] २. पोई ३. तोरई ४. मीठी तोरई ५. बड़ी तोरई ६. सेवा बड़ ७. सेवि ८. डिंडिसि ९. डोडी १०. मारुस ।
११. शाकभेदः—कलंब्युपोदिके स्त्री तु मूलके हिलमोचिका ।
वास्तुकं शाकभेदाः स्युर्दूर्वा तु शतपर्विकेत्यमरः ॥

त्रिदोषशमनं शुष्कं विषदोषहरं लघु ।
तत्फलं कफवातघ्नं तत्पुष्पं कफवातजित् ॥ ५६ ॥
त्रिदोषं बह्वभिष्यन्दि शाकं सर्षपजं गुरु ।
तथैव राजिका तीक्ष्णा तिक्तः[१] पंचागुलः सरः ॥ ५७ ॥

सरूक्षमुष्णं कौसुम्भं पित्तकृत् कफवातजित् ।
ईषत् तिक्तं समधुरं माषपर्णन्तु शुक्रलम् ॥ ५८ ॥
श्रीहस्तिनी[२] सपत्तूरा[३] मूत्रलाश्मरीभेदनी ।
न्यग्रोधोदुम्बराश्वत्थप्लक्षपद्मादिपल्लवाः ॥ ५९ ॥

कषायाः स्तंभना शीताः हिताः पित्तातिसारिणाम् ।
छत्रकास्तु पलालेक्षुकरीरक्षितिवेणुजाः ॥ ६० ॥
सर्वे संस्वेदजाः शीताः कषायाः स्वादुपिच्छिलाः ।
गुरवश्छर्द्यतीसारज्वरश्लेष्मामयप्रदाः ॥ ६१ ॥

स्वादुपाकरसा रूक्षा दोषलास्तु पलालजाः ।
श्वेताः शुद्धस्थलीकाष्ठवंशगोत्रजसंभवाः ॥ ६२ ॥
नातिदोषकरा ज्ञेयाः शेषास्तेभ्यो विगर्हिताः ।
तद्विकल्पोऽल्पदोषाश्च स्थलीगोत्रजसंभवाः ॥ ६३ ॥

कुक्कुटांड[४] इति ख्यातो वृष्यो बल्योऽथ बृंहणः ।
विष्टंभिनः स्मृताः सर्वे छत्रका वातकोपनाः ॥ ६४ ॥
क्रिमिवातहरं शुष्कं जीर्णं यच्चाप्यनार्त्तवम् ।
शाकं निःस्नेहसिद्धं च वर्ज्यं यच्चापरिस्रुतम् ॥ ६५ ॥
अतिजीर्णमकालोत्थं रूक्षं सिद्धामभूमिजम् ।
जरठं कोमलं चातिशीतव्यालादिदूषितम् ॥ ६६ ॥

शुष्कं शाकं च सकलं नाश्नीयान्मूलकं विना ।
पिण्याकी वातला सान्द्रा रुचिष्यानलदीपनी ॥ ६७ ॥
विदारी वातपित्तघ्नी वृष्या बल्या रसायनी ।
वृष्या शतावरी बल्या चक्षुष्या वातपितनुत् ॥ ६८ ॥

महती सैव हृद्या च मेधाग्निबलवर्धनी ।
ग्रहण्यर्शोविकारघ्नी वृष्या शीता[५] रसायनी ॥ ६९ ॥
कफपित्तहरास्तिक्तास्तस्या एवांकुराः स्मृताः ।

---

१. तीक्ष्णः[१] २. तिकपर्णी ३. शिखालिकाभेदः महापत्रः ४. किट्टशाक[२] खुखुण्डक[३] ५. बल्या[२] ।

तरुढ[१]बिस[२]शालूक[३]क्रौंचादनकसेरुकम्[४] ॥ ७० ॥
शृंगाटकं गलोद्यं (ड्यं)[५] च गुरु विष्टंभि शीतलम् ।
पौष्करं तु भवेद्बीजं रक्तपित्तज्वरापहम् ॥ ७१ ॥
तथा तालप्रलम्बं[६] च वातक्षतरुजापहम्[७] ।
पित्तानिलहरो वृष्यः स्वादुर्मुञ्जातकः[८] स्मृतः ॥ ७२ ॥
शंखहस्तिकरक्तांगमधुपिण्डकशृंगकम् ।
शंखाद्यान्यालुकानीह रक्तपित्तहराणि च ॥ ७३ ॥
गुरूणि स्वादुशीतानि स्तन्यशुक्रकराणि च ।
पिण्डालुकं कफकरं गुरु वातप्रकोपणम् ॥ ७४ ॥
सुरेन्द्रकन्दः श्लेष्मघ्नो विपाके कटुः पित्तकृत् ।
बल्यः कदल्याः कंदस्तु वातपित्तहरश्च सः ॥ ७५ ॥
मानकं स्वादु शीतं च गुरु चापि प्रकीर्तितम् ।
दीपनः सूरणो रुच्यः कफघ्नो विशदो लघुः ॥ ७६ ॥
विशेषादर्शसां पथ्यो भूकन्दस्त्वतिदोषलः ।
अम्लिकायाः स्मृतः कन्दो ग्रहण्यर्शोहितो लघुः ॥ ७७ ॥
नात्युष्णः कफवातघ्नो ग्राही शस्तो मदात्यये ।
कुमुदोत्पलपद्मानां कंदा मारुतकोपनाः ॥ ७८ ॥
कषायाः पित्तशमनाः विपाके मधुराः हिमाः ।
मुशली बृंहणी वृष्या वीर्योष्णाऽर्शोऽनिलापहा ॥ ७९ ॥
वराहकंदः श्लेष्मघ्नः कटुको रसपाकतः ।
कुष्ठमेहक्रिमिहरो वृष्योष्णः पित्तवर्द्धनः ॥ ८० ॥
तालस्य नालिकेरस्य खर्जूरस्य शिरांसि च ।
कषायस्निग्धमधुरबृंहणानि गुरूणि च ॥ ८१ ॥
सृष्टमूत्राणि वृष्याणि जीवनप्रीणनानि च ।
बलपुंस्त्वक्षये कासे रक्तपित्तेऽनिले विषे ॥ ८२ ॥
प्रशस्तानि सदा पुंसां शीतानि रुचिदानि[९] च ।
बिंबी[१०] वांतिप्रदा हन्ति रक्तपित्तास्रकामलाः ॥ ८३ ।

---

१. पवनारि, २. विश, ३. तदेवातिस्थूलम्, ४. घिउरी, ५. गटा, ६. अंकुरिततालबीजमज्जा ७. उरः[२,३] ८. उत्तरदेशे प्रसिद्धः । ९. रुचिराणि च[२,३] In Ms. 3 the chapter ends here. १०. कन्दूरी ।

तत्फलं शीतलं स्वादु गुरु पित्तास्रदाहजित्[१] ।
स्तम्भनं लेखनं वातविबन्धानाहकारकम् ॥ ८४ ॥
बालं ह्यनार्तवं जीर्णं व्याधितं क्रिमिभक्षितम् ।
कन्दं विवर्जयेत् सर्वं यो वा सम्यग् न रोहति ८५ ॥
धान्येषु मांसेषु फलेषु चैव शाकेषु चानुक्तमिह प्रसादात् ।
आस्वादतो भूतगुणैर्गृहीत्वा समादिशेद् द्रव्यमनल्पबुद्धिः ॥ ८६ ॥

॥ इति शाकवर्गः ॥

---

१. ईषत्तिक्तं समधुरं शीतं कुन्दुरिकाफलम् ।
विष्टंभि वातलं शाकं शुष्कमन्यत्र मूलकात् ॥[२]

२३. श्रेष्ठवर्गः

षष्टिका यवगोधूमा लोहिता ये च शालयः ।
मुद्गाढकीमसूराश्च धान्येषु प्रवराः स्मृताः ॥ १ ॥
एणः कुरङ्गो हरिणः तितिरिर्लाव एव च ।
मयूरवर्मि[1]कूर्माश्च श्रेष्ठा मांसगणेपु च ॥ २ ॥
दाडिमामलकं द्राक्षा खूर्जरं सपरूषकम् ।
राजादनं मातुलुङ्गं फलवर्गे प्रशस्यते ॥ ३ ॥
चंचूसतीनवास्तूक-चिल्लीमूलकपोतिकाः ।
मण्डूकपर्णी जीवन्ती शाकवर्गे प्रशस्यते ॥ ४ ॥
गव्यं क्षीरं घृतं श्रेष्ठं सैन्धवं लवणेषु च ।
धात्रीदाडिमसम्लेषु पिप्पली नागरं कटौ ॥ ५ ॥
तिक्ते पटोलवार्ताके मधुरे घृतमुच्यते ।
क्षौद्रं पूगफलं श्रेष्ठं कषाये सपरूषकम् ॥ ६ ॥
शर्करेक्षुविकारेषु पानजातौ सुरासवौ ।
परिसंवत्सरं धान्यं मांसं वयसि मध्यमे ॥ ७ ॥
अपर्युषितमन्नं तु संस्कृतं मात्रया शुभम् ।
फलं पर्यागतं शाकमशुष्कं तरुणं नवम् ॥ ८ ॥

॥ इति श्रेष्ठवर्गः ॥

---

१. वर्मी सर्पाकारो मत्स्यः, अथवा रोहित इति जेज्जटः ।

२४. रसवर्गः

चक्षुष्यः प्रीणनो वृष्यो बृंहणोऽनिलपित्तजित्[१] ।
रसायनो गुरुः शीतः स्निग्धश्च मधुरो रसः ॥ १ ॥
पक्त्वा हृद्योऽग्निरुचिकृत् क्लेदनस्तर्पणो मृदुः ।
स्निग्धोष्णोऽम्लो लघुर्वापि वातहा रक्तमांसलः[२] ॥ २ ॥
क्लेदी[३] तीक्ष्णः सरः शुक्रविबन्धानाहदृष्टिहा ।
भेत्ता[४] पक्ताग्निरुचिकृत्[५] स्निग्धोष्णो लवणो गुरुः ॥ ३ ॥
कर्षणो लघुरूक्षोष्णः क्रिमिशुक्रकफापहः ।
रुच्योऽग्निपित्तकृच्छेत्ता तीक्ष्णः शोषी कटुः कटुः ॥ ४ ॥
कफपित्तविषक्लेदकंडूकुष्ठज्वरापहः ।
रूक्षः शीतो लघुस्तिक्तः शोषणः क्रिमिहाग्निकृत् ॥ ५ ॥
कषायः स्तम्भनः शोषी ग्राही रोपणपीडनः ।
कफशोणितपित्तघ्नो रूक्षः शीतो गुरुस्तथा ॥ ६ ॥

॥ इति रसवर्गः[६] ॥

---

१. रक्तपित्त[२], २. नाशनः[१], ३. छेदी[१], ४. भेदी[१], ५. रक्ता[२], ६. इति षड्रसाः[2,3] ।

२५. मण्डवर्गः

मंडस्तु त्रिविधो ज्ञेय एकद्वित्रिपरिस्रुतः[१] ।
लाजैर्भृष्टैरभृष्टैश्च तंडुलैः परिसंस्कृतः ॥ १ ॥
चतुस्त्रिद्विगुणाम्भः स्यात् पूर्वपूर्वो लघुर्हितः ।
लाजमण्डो विशुद्धानां पथ्यः पाचनदीपनः ॥ २ ॥

वातानुलोमनो हृद्यः पिप्पलीनागरान्वितः ।
पाचनो दीपनश्चैव पित्तश्लेष्मानिलापहः ॥ ३ ॥

शूलानाहविबन्धघ्नो वाट्यमण्डः प्रकीर्तितः ।
वाते वातकफे पित्ते सामे वा तरुणे ज्वरे ॥ ४ ॥

वाट्यमंडं प्रशंसन्ति पटोलमगधान्वितम् ।
वाट्यमंडो यवैर्भृष्टैर्लाजमंडस्तु शालिभिः ॥ ५ ॥

रक्तशाल्यादिभिर्धान्यैः[२]मण्डा मधुरशीतलाः ।
श्रेष्ठाः संतर्पणा बल्या रक्तपित्तप्रसादनाः ॥ ६ ॥

सुतण्डुलानां प्रसृतिद्वयं च तदर्द्धमुद्गाः कटुकत्रयं च ।
कुस्तुंबुरीसैन्धवहिंगुतैलमेभिश्च सर्वैः क्रियते हि मंडः ॥ ७ ॥

क्षुद्बोधनो बस्तिविशोधनश्च प्राणप्रदः शोणितवर्द्धनश्च ।
ज्वरापहारी कफपित्तहंता वायुं जयेदष्टगुणो हि मंडः ॥ ८ ॥

हस्तवस्त्रकृतो मंडः सैंधवेनावचूर्णितः ।
रक्तपित्तहरो ग्राही ज्वरातीसारवारणः ॥ ९ ॥

मंडस्तु दीपयत्यग्निं वातं चाप्यनुलोमयेत् ।
मृदूकरोति स्रोतांसि स्वेदं संजनयत्यपि ॥ १० ॥

लंघितानां विरिक्तानां जीर्णे स्नेहे च तृष्यताम् ।
दीपनत्वाल्लघुत्वाच्च मंडः स्यात् प्राणधारणः ॥ ११ ॥

॥ इति मंडवर्गः[३] ॥

---

१. चतुर्द्वित्रिपरिस्रुतः[२], २. चान्ये[१], ३. इति मंडगुणाः[२] ।

२६. अन्नवर्गः

क्षुत्तृष्णाग्लानि[1]दौर्बल्यकुक्षिरोगविनाशिनी ।
स्वेदाग्निजननी पेया वातवर्चोनुलोमनी ॥ १ ॥
विलेपी ग्राहिणी हृद्या तर्पणी बलवर्धनी ।
पथ्या स्वादुरसा लघ्वी दीपनी क्षुत्तृषापहा ॥ २ ॥
तृष्णापनयनी लघ्वी दीपनी बस्तिशोधनी ।
ज्वरे चैवातिसारे च यवागूः सर्वदा हिता ॥ ३ ॥
यैर्यैरेवौषधिगणैर्यवागूः साधु साधिता ।
तांस्तानेवौषधगुणान् पुष्णाति विधियोजिता ॥ ४ ॥
(सिक्थैर्विरहितो मंडः पेया सिक्थसमन्विता ।
विलेपी बहुसिक्था स्यात् यवागूर्विरलद्रवा ॥)
विष्टंभी पायसो बल्यो मेदःकफकरो गुरुः ।
कफपित्तकरी बल्या कृशरानिलनाशनी ॥ ५ ॥
सौमनस्यं बलं पुष्टिमुत्साहं तर्पणं[2] सुखम् ।
स्वादु संजनयत्यन्नमस्वादु च विपर्ययम् ॥ ६ ॥
सुधौततण्डुलः स्निग्धः प्रस्रुतो विशदो लघुः ।
सोष्णश्चैवौदनः पथ्यो विपरीतस्तु दोषकृत् ॥ ७ ॥
भृष्टतण्डुलकश्चैकद्वित्रिर्वापि परिस्रुतः ।
यथोत्तरलघुर्वह्निमोदनो दीपयत्यति[3] ॥ ८ ॥
स्नेहै मांसैः फलैः कंदैर्विदलाम्लैश्च[4] संस्कृताः ।
गुरवो बृंहणा बल्या[5] ये च क्षीरोपसाधिताः ॥ ९ ॥
अत्युष्णान्नं बलं हन्ति शीतं शुष्कं च दुर्जरम् ।
अतिक्लिन्नं ग्लानिकरं दुर्जरं तण्डुलान्वितम्[6] ॥ १० ॥
शीतलं मधुरं साम्लमर्शोघ्नं दीपनं परम् ।
श्रमघ्नं तपणं हृद्यं घोलभक्तं रुचिप्रदम् ॥ ११ ॥
शीतलं मधुरं रूक्षं श्रमघ्नं तर्पणं वरम् ।
लघु द्रुतविपाकं च सद्योऽन्नं वारिभावितम् ॥ १२ ॥
त्रिदोषकोपनं रूक्षं मलकृन्मूत्रलं परम् ।
स्वेदमेदःकफोत्क्लेदि वार्यन्नं निशि संस्थितम् ॥ १३ ॥

॥ इति अन्नवर्गः[7] ॥

---

१. तृष्णानिल[२,३], २. हर्षणं[१], ३. जनयत्यति [२,३], ४. विदलैश्चैव[१], ५. वृष्या[२,३], ६. युक्तियुक्तं रसायनम्[२] ७. इति मंडादिः [२,३]।

२७. पानभक्ष्यवर्गः

सुस्विन्नो निस्तुषो भृष्ट ईषत् सूपो लघुर्हितः।
स्विन्नं निःपीडितं शाकं हितं स्यात्स्नेहसंस्कृतम् ॥ १ ॥
मधुराः लघवः शीताः सक्तवः शालिसंभवाः।
ग्राहिणो रक्तपित्तघ्नास्तृष्णाच्छर्दिज्वरापहाः ॥ २ ॥
छर्द्यतीसारतृड्दाहविषमूर्च्छाज्वरापहाः ।
लाजानां सक्तवः क्षौद्रसितायुक्ता विशेषतः ॥ ३ ॥
लेखना दीपना रूक्षा वातला यवसक्तवः।
कफामयप्रशमना वातवर्चोनुलोमनाः ॥ ४ ॥
शीताः[1] संतपर्णा हृद्याः सद्योबलविवर्धनाः।
वातातपाध्वव्यायामकर्शितानां श्रमापहाः ॥ ५ ॥
गुर्वी पिण्डी खरात्यर्थं लघ्वी सैव विपर्ययात्।
सक्तूनामाशु जीर्येत मृदुत्वादवलेहिका ॥ ६ ॥
सक्तवः सर्पिषाभ्यक्ताः शीतवारिपरिप्लुताः।
नातिद्रवा नातिसांद्रा मन्थ इत्यभिधीयते ॥ ७ ॥
मन्थः सद्योबलकरः पिपासादाहनाशनः।
साम्लस्नेहगुडो मूत्रकृच्छ्रोदावर्तनाशनः ॥ ८ ॥
शर्करेक्षुमधुद्राक्षायुक्तः पित्तविकारनुत्।
द्राक्षामधुसमायुक्तः कफरोगहरः स्मृतः ॥ ९ ॥
वर्गत्रयेणापहितो[2] मलदोषानुलोमनः।
धानो[3]लुंबाः[4]सुलघवः[5] कफमेदोविशोषणाः ॥ १० ॥
लाजास्तृट्छर्द्यतीसारमेदोमेहकफच्छिदः ।
कास[6]पित्तोपशमना दीपना लघवो हिमाः ॥ ११ ॥
पृथुका गुरवः स्निग्धा बृंहणाः कफवर्धनाः।
बल्याः सक्षीरभावात्ते वातघ्ना भिन्नवर्चसः ॥ १२ ॥
धाना विष्टंभिनी रूक्षा तर्पणी लेखनी गुरुः।
विष्टंभि दुर्जरं रूक्षं शीतलं वातकोपनम् ॥ १३ ॥

---

१. शीतजलादिना संपानात्। पीताः[2],[3], २. मधुराम्ललवणेन। ३. वऊरी, ४. होरहा, ५. धान्योद्भवास्तु लघवः[2], मधुद्राक्षधनोलुंबाः[2] ६. कामं[3]।

बद्धवर्चस्करं चैव भृष्टं निष्पावजं फलम् ।
संधानकृतिपिष्टमामं तण्डुलं क्रिमिमेहकृत्[1] ॥ १४ ॥
सुदुर्जरः स्वादुरच्छो बृंहणस्तण्डुलो नवः ।
स्नेहगोरसधान्याम्लफलाम्लकटुकैः सह ॥ १५ ॥
स्निग्धं मांसं हितं बल्यं बृंहणं रोचनं लघु ।
तदेव गोरसान्तं[2] तु सुरभिद्रव्यसंस्कृतम् ॥ १६ ॥
विद्यात् पित्तकफोत्क्लेदि बलमांसाग्निवर्धनम् ।
परिशुष्कं स्थिरं स्निग्धं हर्षणं[3] प्रीणनं गुरु ॥ १७ ॥
रोचनं बलमेधाग्निमांसौजःशुक्रवर्धनम् ।
तदेवोलुप्तपिष्टत्वादुलुप्तमिति[4] पाचकाः[5] ॥ १८ ॥
परिशुष्कं गुणैर्युक्तं नरैः[6] पथ्यतमं मतम् ।
तदेव शूलिकाप्रोतमंगारपरिपाचितम् ॥ १९ ॥
ज्ञेयं गुरुतरं किंचित् प्रदिग्धं गुरुपाकतः ।
उलुप्तं भर्जितं पिष्टं प्रतप्तं कटु पाचितम् ॥ २० ॥
परिशुष्कं प्रदिग्धं च शूल्यं यच्चान्यदीदृशम् ।
दीप्ताग्नीनां सदा पथ्यं खानिष्कं[7] तु परं गुरु ॥ २१ ॥
मांसं यत्तैलभृष्टं[8] तु वीर्योष्णं पित्तकृद् गुरु ।
लघ्वग्निदीपनं हृद्यं रुच्यं दृष्टिप्रसादनम् ॥ २२ ॥
अनुष्णवीर्यं पित्तघ्नं ज्ञेयं घृतविपाचितम्[9] ।
वेशवारो गुरुः स्निग्धो बल्यो वातरुजापहः ॥ २३ ॥
प्रीणनः सर्वधातूनां विशेषान्मुखशोषिणाम् ।
क्षुत्तृष्णापहः श्रेष्ठः सौरावः स्वादुशीतलः ॥ २४ ॥
प्रीणनः प्राणजननः श्वासकासक्षयापहः ।
कफघ्नो दीपनो हृद्यः शुद्धानां व्रणनाशनः ॥ २५ ॥
वातपित्तश्रमहरो रसो मांससमुद्भवः[10] ।
स्मृत्यौजःस्वरहीनानां ज्वरक्षीणक्षतोरसाम्[11] ॥ २६ ॥
भग्नविश्लिष्टसंधीनां कृशानामल्परेतसाम् ।
आप्यायनः संहननः शुक्रदो बलवर्धनः ॥ २७ ॥

---

१. नुत्[2], २. गोरसोपेतं[2], ३. तर्पणं[2],[3], ४. तदेव लुप्तं भृष्टत्वादुल्लुप्तमिति[2],[3], ५. पाचकम्[2], ६. वह्नेः[2],[3], ७. खानिष्कं उद्धृतरसं मासं वेशवारभेदो वा । ८. सिद्धं[2], ९. मनोज्ञं घृतसाधितम्[2],[3] १०. हृद्यो मांसरसः रसः,[2] ११. क्षतौजसाम्[3] ।

सदाडिमयुतो वृष्यः संस्कृतो दोषनाशनः ।
यन्मांसमुद्धृतरसं न तत्पुष्टिबलप्रदम् ॥ २८ ॥
विष्टंभि दुर्जरं रूक्षं विरसं मारुतापहम्[1] ।
कफघ्नो दीपनो हृद्यः शुद्धानां व्रणिनामपि ॥ २९ ॥
उक्तः पथ्यतमश्चापि मुद्गयूषः कृताकृत[2]: ।
प्रीणनः प्राणजननः श्वासकासक्षयापहः ॥ ३० ॥
स तु दाडिममृद्वीकायुक्तः स्याद्रागषाडवः ।
रुचिष्यो लघुपाकश्च दोषाणामविरोधकृद् ॥ ३१ ॥
लघवो बृंहणा वृष्याः हृद्याः रोचनदीपनाः ।
भ्रममूर्च्छातृषाछर्दिश्रमघ्नाः रागषाडवाः ॥ ३२ ॥
मसूरमुद्गगोधूमकुलत्थचणकैः कृतः ।
कफपित्ताविरोधी स्याद्वातव्याधौ प्रशस्यते ॥ ३३ ॥
मृद्वीकादाडिमयुतः स चाप्युक्तोऽनिलार्दिते ।
रोचनो दीपनो हृद्यो लघुपाक्युपदिश्यते ॥ ३४ ॥
पटोलनिम्बूयषौ तु कफमेदोविशोषणौ[3] ।
पित्तघ्नौ दीपनौ हृद्यौ क्रिमिकुष्ठज्वरापहौ ॥ ३५ ॥
श्वासकासप्रतिश्यायप्रसेकारोचकज्वरान् ।
हन्ति मूलकयूषस्तु कफमेदोगलग्रहान्[4] ॥ ३६ ॥
कुलत्थयूषोऽनिलहा शर्कराश्मरिनाशनः ।
तूनीप्रतूनीकासार्शोगुल्मोदर[5]कफापहः ॥ ३७ ॥
यव[6]कोलकुलत्थानां मुद्गमूलकशुंठयोः ।
एकैकां मुष्टिमाहृत्य पचेदष्टगुणे जले ॥ ३८ ॥

---

१. After this there are following Verses in Ms. 2 and 3 :—

दीप्ताग्नीनां सदा शस्तमामिषं परमं गुरु ।
मांसं निरस्थि सुस्विन्नं पुनर्दृषदि चूर्णितम् ॥
पिप्पलीमरिचशुंठीहिंगुसर्पिःसमन्वितम् ।
ऐकध्यं साधयेत् सम्यक् तत् सोरात्रमिति स्मृतम् ॥

॥ मांसादिप्रकारः ॥

२. धान्यकजीरकहिंगुसैन्धवैः कृत एतद्व्यतिरक्तोऽकृतः ।
३. विशोधनौ[3], ४. मेदोऽनिलग्रहान्[1], ५. गुल्ममेदः[2], गुल्ममेहः[3],
६. पञ्च[3] ।

पंचमुष्टिक इत्येष वातपित्तकफे हितः ।
शस्यते गुल्मशूलेषु कासे श्वासे ज्वरे क्षये ॥ ३९ ॥
मुद्गामलाभ्यां यवदाडिमाभ्यां कर्कन्धुना मूलकशुण्ठकेन ।
शुण्ठीकणाभ्यां च कुलत्थकेन यूषो नवांगः कफरोगहन्ता ॥ ४० ॥
दाडिमामलकैर्यूषो हृद्यः संशमनो लघुः ।
प्राणाग्निजननो मूर्च्छामेदोघ्नः कफवातजित् ॥ ४१ ॥
मुद्गामलकयूषस्तु भेदी पित्तकफापहः ।
यव[1]कोलकुलत्थानां यूषः कंठ्योऽनिलापहः ॥ ४२ ॥
यवमंडस्तु कथितो वातपित्तकफापहः ।
पाचनो दीपनश्चैव शूलानाहविबन्धनुत् ॥ ४३ ॥
सर्वधान्यकृतस्तद्वद् बृंहणः प्राणवर्धनः ।
खलकांबलिकौ[2] हृद्यौ छर्दिवातकफे हितौ ॥ ४४ ॥
(दधिमत्स्याम्लसिद्धस्तु यूषःकांबलिकः स्मृतः ।)
बल्यः कफानलौ हन्ति दाडिमाम्लोऽग्निदीपनः ।
धान्याम्लो दीपनो हृद्यः पित्तकृद्वातनाशनः ॥ ४५ ॥
दध्यम्लः श्लेष्मलो बल्यः स्निग्धो वातहरो गुरुः ।
तक्राम्लः पित्तकृत्प्रोक्तो विषरक्तप्रदूषणः ॥ ४६ ॥
अस्नेहलवणं सर्वमकृतं कटुकैर्बिना ।
विज्ञेयं कटुकस्नेहलवणैः संयुतं कृतम् ॥ ४७ ॥
अथ गोरसधान्याम्लफलाम्लैः रंधितं च यत् ।
यथोत्तरं लघु हितं संस्कृतासंस्कृतं तथा ॥ ४८ ॥
तिलपिण्याकविकृतिः शुष्कशाकं विरूढकम् ।
शंडाकीनि गुरूणि स्युः पित्तश्लेष्मकराणि च ॥ ४९ ॥
(रसाला रोचनी बल्या[3] स्निग्धा वृष्या च बृंहणी ।)
स्नेहं गुडसंयुक्तं हृद्यं दध्यनिलापहम् ।
गौडमम्लमनम्लं वा पानकं गुरु मूत्रलम् ॥ ५० ॥
तदेव खण्डमृद्वीकाशर्करासहितं पुनः ।
साम्लं सुतीक्ष्णं सुहिमं पानकं स्यान्निरत्ययम् ॥ ५१ ॥

१. पद्म[१], २. सतक्राणि शिम्बिधान्यामि स्निग्धानि संग्राहकानि खलानीति । दाडिमामलकस्नेहसंयुक्तं व्यञ्जनं खल इत्यन्ये । दधिमत्स्यामकसिद्धस्तु यूषः कांबलिको मतः । तत्राप्रसिद्धः काम्बलिकः अम्लानां बहुत्वात् । ३. हृद्या[२] ।

माद्‍र्वीकं[1] तु श्रमहरं मूर्च्छादाहतृषा[2]पहम् ।
परूषकाणां कोलानां हृद्यं विष्टंभि पानकम् ॥ ५२ ॥
द्रव्यसंयोगसंस्कारात् ज्ञात्वा मात्रां च सर्वशः ।
पानकानां यथायोगं गुरुलाघवमादिशेत् ॥ ५३ ॥
भक्ष्याः क्षीरकृता बल्या वृष्या हृद्याः सुगन्धिनः ।
अदाहिनः पुष्टिकराः दीपनाः पित्तनाशनाः ॥ ५४ ॥
सद्यः[3] प्राणकराः हृद्याः घृतपूराः कफावहाः ।
वातपित्तहरा वृष्या गुरवो रक्तमांसलाः ॥ ५५ ॥
पेषितास्तंडुलाः क्षीरे नालिकेरसितादिभिः ।
अवलोड्य घृते पक्वो घृतपूरोऽयमुत्तमः[4] ॥ ५६ ॥
बृंहणा गौडिकाः भक्ष्याः गुरवोऽनिलनाशनाः ।
विदाहिनः पित्तवहा शुक्रलाः[5] कफवर्द्धनाः ॥ ५७ ॥
मधुशीर्षकसंयाव[6]पूपा ह्येते विशेषतः ।
गुरवो बृंहणाश्चैव मोदकास्तु सुदुर्जराः ॥ ५८ ॥
रोचनो दीपनः स्वर्यः पित्तघ्नः पवनापहः ।
गुरुर्मिष्टतमश्चैव सट्टकः[7] प्राणवर्धनः[8] ॥ ५९ ॥
हृद्यः सुगंधिर्मधुरः स्निग्धः श्लेष्मकरो गुरुः ।
पित्तापहस्तृप्तिकरो बल्योऽभिष्यन्द उच्यते ॥ ६० ॥
आमगोधूमचूर्णं तु सर्पिः क्षीरगुडान्वितम् ।
नातिसान्द्रो नातिघनोऽभिष्यन्दो नाम नामतः ॥ ६१ ॥
बृंहणा वातपित्तघ्नाः बल्याः भद्यास्तु सामिताः[9] ।
हृद्याः पथ्यतमास्तेषां लघवः फेनकादयः ॥ ६२ ॥
मुद्‍गादिवेशवारैस्तु पूर्णा विष्टम्भिनो मताः ।
वेशवारैस्तु पिशितैः सम्पूर्णा गुरुबृंहणाः ॥ ६३ ॥
वेशवारो गुरुः स्निग्धो बलोपचयवर्धनः ।
पललाः श्लेष्मजननाः शष्कुल्यः कफपित्तलाः ॥ ६४ ॥

---

१. माध्वीकं[२], २. ज्वरा[३], ३. तेषां[१], ४. This verse is absent in ms.2 and 3, ५. बृंहणाः[२], ६. लपसीं, ७. लड्डुकः[२] ।

८. लवंगव्योषखंडैस्तु दधिनिर्मण्डगालितम् ।
दाडिमीबीजसंयुक्तं चन्द्रचूर्णावचूर्णितम् ॥

९. समिता गोधमचूर्णम् ।

पर्पटा लघवो रुच्या विशेयाः शालिसंभवाः[१] ।
शालीनां च गुणैस्तुल्याः सक्षारा माषपर्पटाः[२] ॥ ६५ ।
वीर्योष्णाः पैष्टिका भक्ष्याः कफपित्तप्रकोपणाः ।
विदाहिनो नातिबला गुरवश्च विशेषतः ॥ ६६ ॥
गुरवो वैदला भक्ष्याः कषायाः सृष्टमारुताः ।
विष्टंभिनः पित्तकराः श्लेष्मघ्ना भिन्नवर्चसः ॥ ६७ ॥
विरूढककृताः भक्ष्याः गुरवोऽनिलपित्तलाः ।
विदाहोत्क्लेदजनना रूक्षाः दृष्टिप्रदूषणाः ॥ ६८ ॥
फलमांसवसाशाकपललक्षौद्रसंयुताः ।
भक्ष्याः हृद्याश्च बल्याश्च गुरवो बृंहणास्तथा ॥ ६९ ॥
गुरवस्तर्पणाः वृष्याः[३] क्षीरेक्षुरसपूपकाः ।
सगुडाः सतिलाश्चैव सक्षारक्षौद्रशर्कराः ॥ ७० ॥
भक्ष्या बल्याश्च वृष्याश्च परं तु गुरवो मताः ।
हृद्याः सुगन्धिनो वृष्याः लघवो घृतपाचिताः ॥ ७१ ॥
वातपित्तहरा बल्या बल[४]दृष्टिप्रसादनाः ।
विदाहिनस्तैलकृताः गुरवः कटुपाकिनः ॥ ७२ ॥
उष्णाः मारुतदृष्टिघ्नाः पित्तलास्त्वस्र[५]दूषणाः ।
फलमांसेक्षुविकृतितिल[६]माषोपसंस्कृताः ॥ ७३ ॥
भक्ष्या बल्यास्तु गुरवो बृंहणा हृदयप्रियाः ।
खर्परांगारभक्ष्याः स्युः[७] लघवो वातकोपनाः ॥ ७४ ॥
अपववाः गुरवश्चापि भूयिष्ठं लघवो मताः ।
सकिलाटादयो भक्ष्याः[८] गुरवः कफवर्धनाः ॥ ७५ ॥
(कुल्माषा वातला रूक्षा गुरवो भिन्नवर्चसः ।)
द्रव्येण यद्गुणेनेह यद्वीर्येण च साधिताः ।
तद्वीर्यास्तद्गुणाश्चैव ज्ञेया भक्ष्याश्चिकित्सकैः ॥ ७६ ॥

॥ इति पानभक्ष्यवर्गः[९] ॥

---

१. लघीयान् क्षारपर्पटः २, ३ । २. This line is absent in Ms. 2 & 3. ३. हृद्याः २, ३, ४. वर्ण्याः २ वर्ण्य ६, ५. पित्तलासृक्प्रदूषणाः २, ३ ६. फलमांसवसा चैव तैल २, ३, ७. कपालांगारपक्वास्तु ३, ८. रूक्षाः १, ९. यूषादिक्रमः २ ।

२८. अनुपानविधिः

शीतोष्णतोयासव[1]मद्ययूषफलाम्लधान्याम्लपयोरसानाम् ।
यस्यानुपानं तु भवेद्धितं यत्तस्मै प्रदेयं त्विह मात्रया तत् ॥ १ ॥
व्याधिं च कालं च विभज्य धीरैर्द्रव्याणि योज्यानि च तानि तानि ।
सर्वानुपानेषु बरं वदन्ति मेध्यं यदम्भः शुचि भाजनस्थम्[2] ॥ २ ॥
यथा जलगतं तैलं तत्क्षणादेव सर्पति ।
तथा भेषजमंगेषु प्रसर्पत्यनुपानतः[3] ॥ ३ ॥
स्निग्धोष्णं मारुते शस्तं पित्ते मधुरशीतलम् ।
कफेऽनुपानं रूक्षोष्णं क्षये मांसरसः परम् ॥ ४ ॥
उष्णोदकानुपानं तु स्नेहानामथ शस्यते ।
ऋते भल्लातकस्नेहात्तत्र तोयं सुशीतलम् ॥ ५ ॥
अनुपानं वदन्त्येके तैले यूषाम्लकांजिकम् ।
शीतोदकं माक्षिकस्य पिष्टान्नस्य च सर्वशः ॥ ६ ॥
दधिपायसमद्यार्त्तिविषयुक्ते तथैव च ।
केचित् पिष्टमये त्वाहुरनुपानं सुखोदकम् ॥ ७ ॥
यूषो[4] मांसरसो वापि शालिमुद्गादिभोजिनाम् ।
माषादेरनुपानं तु धान्याम्लं दधिमस्तु वा ॥ ८ ॥
अल्पाग्नीनामनिद्राणां तंद्राशोकभ्रमक्लमैः ।
मद्यमांसोचितानां च मद्यमेवानुशस्यते ॥ ९ ॥
असद्यपानासुदकं फलाम्लं वा प्रशस्यते ।
उपवासाध्वभाष्यस्त्रीमारुतातपकर्मभिः ॥ १० ॥
क्लान्तानामनुपानार्थं पयः पथ्यं तथाऽमृतम् ।
सुरा कृशानां स्थूलानामनुशस्तं[5] मधूदकम् ॥ ११ ॥
निरामयाणां चित्रं तु भुक्तमध्ये प्रशस्यते ।
हितं शोणितपित्तेभ्यः क्षीरमिक्षुरसस्तथा ॥ १२ ॥

---

१. द्रव[2], २. Absent in Ms. । ३. Absent in Ms. 1 & 3
४. पयो [2,3], ५. पानं[2,3] ।

अक्ष[1]शैलुशिरीषाणामासवास्तु विषार्त्तिषु ।
दोषवद् गुरु वा भुक्तमतिमात्रमथापि वा ॥ १३ ॥
यथोक्तेनानुपानेन सुखमन्नं प्रजीर्यति ।
रोचनं बृंहणं वृष्यं दोषसंघातभेदनम् ॥ १४ ॥
तर्पणं मार्दवकरं श्रमक्लमहरं सुखम् ।
दीपनं दोषशमनं पिपासाछेदनं मतम् ॥ १५ ॥
बल्यं वर्णकरं चापि त्वनुपानं सदोच्यते ।
तदादौ कर्शयेत्पीतं स्थापयेन्मध्यसेवितम् ॥ १६ ॥
पश्चात्पीतं बृंहयति तत्समीक्ष्य प्रयोजयेत् ।
स्थिरतांगतमक्लिन्नमन्नमद्रवपायिनाम् ॥ १७ ॥
भवत्याबाधजननमनुपानमतः पिबेत् ।
न पिबेत् श्वासकासार्त्तो न रोगे तूर्ध्वजत्रुगे ॥ १८ ॥
क्षतोरस्कः प्रसेकी च यः स्याच्चोपहतस्वरः ।
पीत्वाध्वभाष्याध्ययनगेयस्वप्नान्न शीलयेत् ॥ १९ ॥
प्रदूष्यामाशयं तद्धि तस्य कंठोरसि स्थितम् ।
मंदाग्निसादछर्द्यादीन् जनयेदामयान्बहून् ॥ २० ॥
अनुपानं प्रयोक्तव्यं व्याधौ श्लेष्मभवे पलम् ।
पलद्वयं त्वनिलजे पित्तजे च पलत्रयम्[2] ॥ २१ ॥
व्यंगवलीपलितघ्नं पीनसवैस्वर्यकासशोथहरम् ।
रजनीक्षयेषु नस्यं रसायनं दृष्टिजननं च ॥ २२ ॥
सवितुः समुदयकाले प्रसृतीः सलिलस्य पिबेदष्टौ ।
रोगजरापरिमुक्तो जीवेत् संवत्सरं शतं साग्रम् ॥ २३ ॥
अन्नपानकृतान् दोषान् वातपित्तकफोद्भवान् ।
हरीतकी हरत्याशु भुक्तस्योपरि योजिता ॥ २४ ॥

॥ इत्यनुपानविधिः ॥

---

१. अर्क[2] ।

२. After this the chapter ends in Ms. 2 & 3. Further Verses are included in the next chapter.

२६. प्रकीर्णवर्गः

लंघनं कफमेदोघ्नमामज्वरहरं लघु ।
पाचनं दीपनं वातकरं शूलातिसारजित् ॥ १ ॥
तन्न युक्तं नरे बाले गर्भिण्यां स्थविरे कृशे ।
शोककामभयक्रोधमार्गश्रमचिरज्वरे[1] ॥ २ ॥
आहारः प्रीणनः सद्योबलकृद्देहधारकः ।
स्मृत्यायुःपक्ति[2]वर्णौजःसत्त्वोत्साहविवर्धनः ॥ ३ ॥
भुक्त्वोपविशतस्तुंदं भुक्त्वा संविशतः सुखम् ।
आयुश्चंक्रममाणस्य मृत्युर्धावति धावतः ॥ ४ ॥
ताम्बूलपत्रं तीक्ष्णोष्णं कटु वातकफापहम् ।
पित्तकृत् स्रंसनं स्वर्यं वह्निकृद्वक्त्रशोधनम् ॥ ५ ॥
कफपित्तहरं रूक्षं वक्त्रक्लेदमलापहम् ।
कषायमीषन्मधुरं किंचित्पूगफलं सरम्[3] ॥ ६ ॥
पूगं स्विन्नं[4] त्रिदोषघ्नं पक्वं शुष्कं[5] तु वातलम् ।
सरसं गुर्वभिष्यंदि तद्भृशं[6] वह्निनाशनम् ॥ ७ ॥
चूर्णं कफानिलहरं खदिरं कफपित्तजित्[7] ।
संयोगतो दोषहरं सौमनस्यं करोति च ॥ ८ ॥
(मुखवैशद्यसौगन्ध्यकान्तिसौष्ठवकारकम् ।)
द्विपर्णमर्द्धपूगंच सचूर्णखदिरं च यत् ।
स्नानोत्तरं सदा खादेद् पुरुषेषु सदा हितम् ॥ ९ ॥
पथ्यं सुप्तोत्थिते भुक्ते भ्रान्ते वान्ते च मानवे ।
रूक्षदुर्बलमत्तानां न हितं चास्यरागिणाम् ॥ १० ॥
श्रमानिलहरं वृष्यं पुष्टिनिद्राधृतिप्रदम् ।
सुखशय्याशनं तस्माद्विपरीतमतोऽन्यथा ॥ ११ ॥
त्रिदोषशमनी खट्वा तूली वातकफापहा ।
भूशय्या बृंहणी वृष्या काष्ठपाटस्तु वातलः ॥ १२ ॥

---

१. शोककामक्रोधमार्गश्रमवातज्वरेषु च[1], २. जठराग्नि, ३. मतम्[2], ४. स्निग्धं[1], ५. सुगुरु[2], ६. दोषकृद्[2,3], ७. कफवातजित्[1] ।

पादप्रक्षालनं पादमलरोगश्रमापहम् ।
दृष्टिप्रसादजननं[1] रक्षोघ्नं प्रीतिवर्धनम् ॥ १३ ॥
पुष्टिवर्णबलोत्साहवह्निदीप्तिमतंद्रिताम् ।
करोति धातुसाम्यं च निद्रा काले निषेविता ॥ १४ ॥
रात्रौ जागरणं रूक्षं स्निग्धं प्रस्वपनं दिवा ।
अरूक्षमनभिष्यंदि चासीनप्रचलायितम्[2] ॥ १५ ॥
देहवृत्तौ यथाहारस्तथा स्वप्नः समाहितः ।
स्वप्नाहारसमुत्थे च स्थौल्यकार्श्ये विशेषतः ॥ १६ ॥
कफमेदोविषार्तानां रात्रौ जागरणं हितम् ।
दिवास्वापस्तु तृट्शूलहिक्काजीर्णातिसारिणाम् ॥ १७ ॥
अधर्मः सर्वधातूनां[3] प्रकोपश्च भवेन्महान् ।
ग्रीष्मवर्जेषु कालेषु दिवास्वप्ननिषेवणम् ॥ १८ ॥
दिवा वा यदि वा रात्रौ निद्रा सात्मीकृता तु यैः ।
न तेषां स्वपतां दोषो जाग्रतां वा विधीयते ॥ १९ ॥
उचितो हि दिवास्वप्नो नित्यं येषां शरीरिणाम् ।
वातादयः प्रकुप्यन्ति तेषामस्वपनाद् दिवा ॥ २० ॥
मेध्यं पवित्रमायुष्यमलक्ष्मीमलनाशनम् ।
पादयोर्मलमार्गाणां शौचाधानमभीक्ष्णशः ॥ २१ ॥
कासोपलेपस्वरभेदनिद्रातंद्रास्यदौर्गन्ध्यविषोपसर्गाः ।
कफप्रसेकग्रहणीप्रदोषा भवन्ति जन्तोर्वमिनो न शूलम् ॥ २२ ॥
मूर्धप्रसादो बलमिन्द्रियाणां धातुस्थिरत्वं बलमग्निदीप्तिम् ।
चिराच्च पाकं वयसः करोति विरेचनं सम्यगुपास्यमानम् ॥ २३ ॥
बस्तिर्वाते च पित्ते च कफे रक्ते च शस्यते ।
संसर्गे सन्निपाते च बस्तिरेव सदा हितः[4] ॥ २४ ॥
निहन्ति गन्धवैरस्यं जिह्वादन्तास्यजं मलम् ।
निःकृष्य रुचिमाधत्ते सद्यो दंतविशोधनम् ॥ २५ ॥
करंजकरवीरार्कमालतीककुभासनाः ।
शस्यन्ते दंतपवने ये चाप्येवंविधाः द्रुमाः ॥ २६ ॥

---

१. प्रसादनं वृष्यं[२,३] । २. हिंडोलम् ३. भूतानां[२] दोषाणां[३] ।
४. This and the above two verses are absent in MS. 1.

कषायं कटु तिक्तं वा तत्खादेत्प्रातरुत्थितः ।
मधुत्रिकटुकाक्तं वा सतैलं सैन्धवेन वा ॥ २७ ॥
न खादेन्मुखशोषी च कासहिक्कावमीषु च ।
दुर्बलोऽजीर्णभुक्तश्च मूर्च्छार्त्तो मदपीडितः ॥ २८ ॥
शिरोरुजार्तस्तृषितः श्रान्तः पानक्लमार्दितः ।
अर्दिती कर्णशूली च दन्तरोगी नवज्वरी ॥ २९ ॥
जिह्वाविलेखनं रौप्यं सौवर्णं वार्क्षमेव वा ।
तन्मलापहरं शस्तं मृदु श्लक्ष्णं दशांगुलम् ॥ ३० ॥
मुखवैरस्यदौर्गन्ध्यशोषजाड्यापहं सुखम् ।
ओष्ठस्फुटनपारुष्यमुखशोषद्विजामयाः ॥ ३१ ॥
न स्युः स्वरोपघाताश्च स्नेहगण्डूषधारणात् ।
खदिरक्षीरवृक्षारिमेदजः कवडग्रहः ॥ ३२ ॥
अरोचकास्यवैरस्यमलपूतिप्रसेकजित् ।
सुखोष्णोदकगण्डूषै र्जायतेवक्त्रलाघवम् ॥ ३३ ॥
रक्तपित्तक्षतक्षीणरूक्षोत्कुपितचक्षुषाम ।
विषमूर्छामदार्त्तानां शोषिणां न च तद्धितम् ॥ ३४ ॥
पक्ष्मलं विशदं कान्तममलोज्वलसंडलम् ।
नेत्रमञ्जनसंयोगाद् भवेच्चामलतारकम् ॥ ३५ ॥
लाघवं कर्मसामर्थ्यं स्थैर्यं क्लेशसहिष्णुता ।
दोषक्षयोऽग्निवृद्धिश्च व्यायामादुपजायते ॥ ३६ ॥
व्यायामात् स्विन्नगात्रस्य[1] पद्भ्यामुद्वर्त्तितस्य च ।
व्याधयो नोपसर्पन्ति वैनतेयमिवोरगाः ॥ ३७ ॥
व्यायामं कुर्वतो नित्यं विरुद्धमपि भोजनम् ।
विदग्धमविदग्धं वा निर्दोषं परिपच्यते ॥ ३८ ॥
न च व्यायामसदृशमन्यत् स्थौल्यापकर्षणम् ।
न च व्यायामिनं मर्त्यं मर्दयन्त्यरयो बलात् ॥ ३९ ॥
न चैनं सहसाऽऽक्रम्य जरा समधिगच्छति ।
स्थिरीभवति मांसं च व्यायामाभिरतस्य च ॥ ४० ॥
व्यायामो हि सदा पथ्यो बलिनां स्निग्धभोजिनाम् ।
स च शीते वसन्ते च तेषां पथ्यतमः स्मृतः ॥ ४१ ॥

---

१. दीप्तोऽग्निर्मेदसः क्षयः विभक्तघनगात्रत्वम् ।

सर्वर्त्तुषु च सर्वैस्तु मर्त्यैरात्महितार्थिभिः ।
शक्त्यर्धेनैव कर्त्तव्यो व्यायामो हन्त्यतोऽन्यथा ॥ ४२ ॥
कण्ठे[1] ललाटे ग्रीवायां यदा स्युः स्वेदबिन्दवः ।
शक्त्यर्धं तं विजानीयाद् वक्त्रोच्छ्वासोऽथ[2] वापि वा ॥ ४३ ॥

वयो बलं शरीरं च देशकालमथापि वा ।
समीक्ष्य कुर्याद् व्यायाममन्यथा रोगमाप्नुयात्[3] ॥ ४४ ॥
रक्तपित्ती कृशः शोषी कासी श्वासी क्षतातुरः ।
भुक्तवान् स्त्रीषु च क्षीणो व्यायामं परिवर्जयेत् ॥ ४५ ॥

श्रमः क्लमः क्षयस्तृष्णा रक्तपित्तापतानकाः ।
अतिव्यायामतः कासो ज्वरः छर्दिश्च जायते ॥ ४६ ॥

प्रीतिनिद्राकरं वृष्यं कफवातश्रमापहम् ।
संवाहनं मांसरक्त[4]त्वक्प्रसादकरं सुखम् ॥ ४७ ॥
पौष्टिकं धन्यमायुष्यं शुचि रूपविराजितम्[5] ।
केशश्मश्रुनखादीनां कर्त्तनं[6] संप्रसाधनम्[7] ॥ ४८ ॥

केशप्रसाधनी केश्या रजोजन्तुमलापहा ।
केशभूमिगतान् रोगान् शिरोऽभ्यंगोऽपकर्षति ॥ ४९ ॥
(केशानां मृदुतां स्नेहं रुक्प्रशान्तिं करोति च)
करोति शिरसस्तृप्तिं केशानां मृदुतामपि ।
संतर्पणं चेन्द्रियाणां दत्तं मस्तकतैलकम्[8] ॥ ५० ॥

प्रसन्नदृष्टिर्दृढदन्तकेशः शशांकवक्त्रः पलितैर्विहीनः ।
पिकाभकंठः कमलास्यगंधो नस्योपसेवी भवतीह मर्त्यः ॥ ५१ ॥

न कर्णरोगा बाधन्ते[9] न मन्याहनुसंग्रहः ।
नोच्चैः श्रुतिर्न बाधिर्यं स्यान्नित्यं कर्णपूरणात् ॥ ५२ ॥

अभ्यङ्गो मार्दवकरः कफवातविनाशनः ।
धातूनां पुष्टजननो मृजा[10] वर्णबलप्रदः ॥ ५३ ॥

निद्राकरो देवसुखश्चक्षुष्यः पादरोगहा ।
पादत्वङ्मार्दवकरः पादाभ्यंगः सदा हितः[8] ॥ ५४ ॥

---

१. कुक्षौ[३] २. वक्त्रादायासः श्वास एव वा ३. व्यायामं युक्त्या शक्त्या च बुद्धिमान्[२,३] ४. मांसकरं[२], ५. रुचिरूपविराजनम्[२], ६. कल्पनं[२] ७. After this there is कीर्त्तिदं कान्तिजननं कंडूघ्नं मूर्धरोगजित् in MS. 3. ८. तर्पणम्[२,३], ९. वातोत्था[१], १०. नृणां[३], ११. प्रशस्यते[२,३] ।

सेकः श्रमघ्नोऽनिलहा भग्नसंधिप्रसादकः ।
क्षताग्निदग्धाभिहतविश्लिष्टानां रुजापहः ॥ ५५ ॥
सिक्तस्याद्भिः प्रवर्धन्ते यथा मूलाङ्कुरास्तरोः ।
तथा धातुविवृद्धिर्हि स्नेहसिक्तस्य जायते ॥ ५६ ॥
सिरामुखै रोमकूपैर्धमनीभिश्च तर्पयन् ।
शरीरे वलमाधत्ते स्नेहः युक्तोऽवगाहने ॥ ५७ ॥
तत्र प्रकृतिसात्म्यर्तुदेशदोषविकारवित् ।
तैलं घृतं वा मतिमान् युंज्यादभ्यंगसेकयोः ॥ ५८ ॥
केवलं त्वामदोषेषु न कथंचन योजयेत् ।
तरुणज्वर्यजीर्णी च नाभ्यक्तव्यौ कथंचन ॥ ५९ ॥
तथा विरिक्तो वान्तश्च निरूढो यश्च मानवः ।
पूर्वयोः कृच्छ्रता व्याधेरसाध्यत्वमथापि वा ॥ ६० ॥
(शेषानां तदहःप्रोक्ताः वह्निमांद्यादयोगदाः ।)
उद्वर्त्तनं वातहरं कफमेदोविनाशनम् ।
स्थिरीकरणमंगानां त्वक्प्रसादकरं परम् ॥ ६१ ॥
सिरासु च विविक्तत्वं त्वक्स्थस्याग्रे च तेजसः ।
उत्सादनं बीभत्सानां विशेषात् कान्तिवर्धनः ॥ ६२ ॥
प्रकर्षसौभाग्यमृजालाघवादिगुणान्वितम् ।
उद्धर्षणं च विज्ञेयं क्षुद्रकोष्ठानिलापहम्[१] ॥ ६३ ॥
दौर्गन्ध्यं गौरवं तन्द्रां कण्डूं मलमरोचकम् ।
स्वेदं बीभत्सतां हन्ति शरीरपरिमार्जनम् ॥ ६४ ॥
दीपनं वृष्यमायुष्यं स्नानमोजोबलप्रदम् ।
कंडूमलश्रमस्वेदतन्द्रातृट्दाहपाप्मजित् ॥ ६५ ॥
स्नाने सति मनुष्यस्य चोष्मा सर्वांगगस्तदा ।
क्षिप्रमेकत्वमायाति ततो दीप्यति पावकः ॥ ६६ ॥
उष्णाम्बुनाधः कायस्य परिषेको बलावहः ।
तेनैव चोत्तमांगस्य बलहृत्केशचक्षुषाम् ॥ ६७ ॥
स्नानमर्दितनेत्रास्यकर्णरोगातिसारिषु ।
आध्मानपीनसाजीर्णभुक्तवत्सु च गर्हितम् ॥ ६८ ॥
यशस्यं स्वर्ग्यमायुष्यं धनधान्याभिवर्द्धनम् ।
गुरुदेवद्विजातीनां पूजनं गोत्रवर्धनम् ॥ ६९ ॥

१. These two Verses are only in MS. 3.

तंद्रापापोपशमनं प्रीत्यो[1]जोबलवर्द्धनम् ।
स्वेदवैवर्ण्यदौर्गन्ध्यश्रमघ्नमनुलेपनम् ॥ ७० ॥
मुखलेपात्[2] दृढं चक्षुः पीनगंडं तथाननम्[3] ।
कान्तमव्यङ्गपिडकं भवत्यम्बुजसन्निभम् ॥ ७१ ॥
काम्यं यशस्यमायुष्यमलक्ष्मीघ्नं प्रहर्षणम् ।
श्रीमत्पारिषदं शस्तं निर्मलाम्बरधारणम् ॥ ७२ ॥
रक्षोघ्नमथ चौजस्यं[4] सौभाग्यकरमुत्तमम् ।
सुमनोऽम्बररत्नानां धारणं प्रीतिवर्द्धनम् ॥ ७३ ॥
कंबलः पटगर्भश्च महाशीतनिवारणः ।
स एव विपरीतश्च महावृष्टिनिवारणः ॥ ७४ ॥
पादरोगहरं वृष्यमायुष्यं चक्षुषोर्हितम् ।
सुखप्रचारमोजस्यं सदा पादत्रधारणम् ॥ ७५ ॥
अनारोग्यमनायुष्यं चक्षुषोरुपघातकम्[5] ।
पादाभ्यामनुपानद्भ्यां नृणां चंक्रमणं सदा ॥ ७६ ॥
(पवित्रं केश्यमुष्णीषं वातातपरजोपहम् ।)
छत्रं वर्षातपरजोमारुतापहरं शिवम् ।
लक्ष्मीभूतं यशस्यं च लोके शोभाकरं परम् ॥ ७७ ॥
सत्वोत्साहबल[6]स्थैर्यधैर्यवीर्याभिवर्धनम् ।
अवष्टंभकरं चापि भयघ्नं दण्डधारणम् ॥ ७८ ॥
अध्वा मेदःकफस्थौल्य[7]सौकुमार्यविनाशनः ।
यत्तु चंक्रमणं नाति देहपीडाकरं भवेत् ॥ ७९ ॥
तदायुर्बलमेधाग्निप्रदमिन्द्रियबोधनम् ।
आस्या वर्णकफस्थौल्य[8]सौकुमार्यकरी सुखा ॥ ८० ॥
शीतं कफानिलावुष्णं रक्तपित्तं रजोऽनिलम् ।
धूमः पितानिलौ कुर्यादवश्यायः कफानिलौ ॥ ८१ ॥
अग्निर्वातकफस्तम्भशीतवेपथुनाशनः ।
आमाभिष्यन्दशमनो रक्तपित्तप्रदूषणः ॥ ८२ ॥
आतपः पित्तरक्ताग्नि[9]स्वेदमूर्च्छातृषावहः ।
दाहवैवर्ण्यजननः छाया त्वेतान् व्यपोहति ॥ ८३ ॥

---

१. स्मृत्यो[२,३], २. मुखालेपात्[२,१], ३. दृढवपुः पीनो गंडस्तथाननः[१], ४. रक्षोघ्नं च सदौजस्यं[२] रक्षोघ्नं वश्यमायुष्यं[३], ५. इन्द्रियघ्नमदृष्टिकृत्[२], ६. वयः ७. वर्णबलश्लेष्म[२,३] ८. श्लेष्ममेच २,१ ९. ति[२] ।

अभ्रच्छाया श्रमायासमूर्च्छासंतापनाशिनी ।
कषाया मधुरा ज्योत्स्ना दाहास्रृक्पित्तनाशिनी ॥ ८४ ॥
भयावहं तमस्तिक्तं कुक्कुटी[1] कफपित्तला[2] ।
शीताभिष्यन्दिनी वृष्टिर्वृष्या निद्रालसप्रदा ॥ ८५ ॥
प्रवातं रौक्ष्यवैवर्ण्यस्तम्भकृद्दाहपित्तनुत् ।
स्वेदमूर्च्छापिपासाघ्नमप्रवातमतोऽन्यथा ॥ ८६ ॥
सुखं प्रवातं सेवेत ग्रीष्मे शरदि चोत्तमम्[3] ।
निवातमायुषे सेव्यमारोग्याय च सर्वदा ॥ ८७ ॥
प्राग्वायुरुष्णोऽभिष्यदी त्वग्गदार्शोविषक्रिमीन् ।
सन्निपातज्वरश्वासमामवातं प्रकोपयेत् ॥ ८८ ॥
पश्चिमः शिशिरो हन्ति मूर्च्छादाहतृषाविषान् ।
प्राग्गुणो दक्षिणः प्रोक्तः उत्तरः पश्चिमानुगः ॥ ८९ ॥
विष्वग्वायुरनायुष्यः प्राणिनां नेत्ररोगकृत् ।
सर्वर्तुलिंगतो[4] हन्ता कृत्योत्पातपुरःसरः ॥ ९० ॥
बालव्यजनमोजस्यं मक्षिकादीन् व्यपोहति ।
स्वेददाहतृषामूर्छाश्रमघ्नो व्यजनानिलः ॥ ९१ ॥
तालवृन्तभवं वातं त्रिदोषशमनं विदुः ।
सोष्णं वेणुमयं[5] चैव वातपित्तप्रकोपणम् ॥ ९२ ॥
चामरो वस्त्रवातश्च मायूरो वेत्रजस्तथा ।
एते दोषजितो वाताः स्निग्धा हृद्याश्च पूजिताः ॥ ९३ ॥
वहूदकनगोऽनूपो कफमारुतरोगवान्[6] ।
जांगलोऽल्पाम्बुशाखी च रक्तपित्तगदोत्तरः ॥ ९४ ॥
(साधारणं सममलं त्रिधा भूदेशमादिशेत् ।)
आयुर्घृते गुडे रोगा मृत्युर्लीनो विदाहिषु ।
आरोग्यं कटुतिक्तेषु बलं मांसपयःसु च ॥ ९५ ॥
सद्योमांसं नवान्नं च बाला स्त्री क्षीरभोजनम् ।
घृतमुष्णोदकं चैव सद्यः प्राणकराणि षट् ॥ ९६ ॥
पूतिमांसं स्त्रियो वृद्धा बालार्कस्तरुणं दधि ।
प्रभाते मैथुनं निद्रा सद्यः प्राणहराणि षट् ॥ ९७ ॥

---

१. कुहिरि, २. वातला[3], ३. चातुरः[2]वा नर[3], ४. लिंगको[3], ५. भवं[1], ६. This alongwith other two successive lines is absent in Ms. 1.

अन्नादष्टगुणं पिष्टं पिष्टादष्टगुणं पयः ।
पयसोऽष्टगुणं मांसं मांसादष्टगुणं घृतम् ॥ ९८ ॥
(घृतादष्टगुणं तैलं मर्दने न तु भोजने[१] ।)
सतताध्ययनं वादः परतंत्रावलोकनम् ।
सद्विद्या चाचार्यसेवा च बुद्धिमेधाकरो गणः ॥ ९९ ॥
आयुष्यं भोजनं जीर्णे वेगानामविधारणम् ।
ब्रह्मचर्यमहिंसा च साहसानां च वर्जनम् ॥ १०० ॥
सुश्रुतचरकपराशरवाग्भटहरिचन्द्रभेड[२]वैदेहैः ।
हारीताद्यैरपरै[३]रुक्तं यद् यन् महामुनिभिः[४] ॥ १०१ ॥
आकृष्य सर्वशास्त्राण्युपयुक्तसमस्तवस्तुगुणदोषः[५] ।
माधवकविना रचितः सुखहेतोः सर्वसत्वानाम् ॥ १०२ ॥

॥ इति श्रीद्रव्यगुणः समाप्तः[६] ॥

---

१. This line is not found in Ms. 1. २. भोज[१], ३. हारीताद्यैराद्यैरप्युक्तं[२], ४. This verse is absent in Ms. 1. ५. Ms. 3 ends here. ६. इति श्रीमाधवाभिधानद्रव्यगुणं समाप्तम्[२] ।

NOTES ON TEXTUAL VARIATIONS

Chapter 1.

In Ms. 3 the subject starts from verse 3.

Verse 3 : स्वस्वायुष्य[1], स्वस्थास्वस्थं[2], स्वच्छास्वच्छं[3]

Verse 5 : संप्रयुक्तो[3], स्तूपयुक्तो[2]

Verse 6 : The second line of the verse reads in Mss. 2 and 3 respectively as follows :—

"युक्तैर्यान्तीह संक्षेपाद् सर्वदा सर्वधातवः
युक्तैर्यान्तीह संक्षेपाद् दोषाद्याः सर्वधातवः"

After this verse there is an additional verse in Ms. 3 which mentions the contents of the work :—

'ओषधीषु सकला द्रववर्गा धान्यमांसफलशाकरसाश्च ।
कृत्यमन्नमनुपानकयुक्तं भावनावरचनाक्रम एषः ॥'

Complete verse 8 and the first line of verse 9 containing the uses of Haritaki are absent in Ms. 2.

Verse 11 : मेहकुष्ठविनाशिनी[3]
दीपनी चैषा[2]

» 14 : the description of राजवृक्ष is given in Ms. 2 as :—

'राजवृक्षोऽधिकं पथ्यो मृदुर्मधुरशीतलः ।
तत्पुष्पं वातलं ग्राहि तिक्तं पित्तकफापहम् ॥
तत्फलं मधुरं बल्यं वातपित्तापहत् सरम् ।
तन्मज्जा मधुरः पाके स्निग्धः पित्तसमीरजित् ॥
पीतं तोयेन निर्णाशेद् गृध्रसीं प्रबलामपि ।'

Its local name has been given as 'अरोगा'. The last line is found in Ms. 3 too.

Verse 16 : कफपित्तास्रुरुक्[3]

» 17 : In Mss. 2 and 3 the verse is as follows :—

मूधात्री वातकृत्तिक्ता कषाया मधुरा हिमा ।
पिपासाकासपित्तास्रकफपाण्डुक्षयापहा ॥'

» 18 : मेहपित्तविषापहः[3]

» 19 : In Ms. 3 the second line is as :—

'तत्फलं भेदनं हृद्यमुष्णं कुष्ठहरं लघु'

This line is absent in Ms. 2.

» 20 : The local name of पर्पट is given as दमनपापर in Ms. 2.

Verse 21 : कुटजः कफपित्तासृग[२, ३]
" 23 : कफघ्नं कटुकं तिक्तं[3]
" 25 : After the first line there is the following Verse in Ms. 2 :—

'फलेषु परिपक्वं यत् गुणवत्तदुदाहृतम् ।
बिल्वादन्यत्र विज्ञेयमामं तद्धि गुणोत्तरम् ॥'

This is again found in फलवर्ग after Verse 64.

" 27 : लोहितं केशरागं च[२], केशरागश्च[3]
" 28 : The local name of हस्तिदन्ती has been given as 'बड़ी दन्ती' in Ms. 2.
" 29 : दूषीशोथोदरप्लीह[२]
" 30 : मदात्युत्क्लेदकारिणी[3]. The local name has been given as चोका in Ms. 2.
" 31 : L. N. अकवन[२]
" 32 : आरुष्करं तौवरकं[3]
" 33 : उष्णं कृमिज्वरानाह[२] L. N. भेला[२]
The second line is absent in Ms. 2.
" 35 : वर्ण्यः स्वर्यः कटुः पाके[२, 3]
रूक्षः सूक्ष्मोऽग्निदीपनः[२]
" 36 : पुराणस्त्वतिकर्षणः[3]
" 37 : पत्रे सक्षारमधुरो[२, 3]
" 41 : Absent in Mss. 2 and 3.
" 42 : L. N. गाजर, पलाण्डुभेदः[२]
" 43 : L. N. आदा[२]
" 44 : The portion from the first half of the verse 44 upto the first half of the verse 48 is absent in Mss. 2 and 3.
" 48 : रक्तपित्तहृत्[२, 3] L. N. आदी[२]
" 50 : कासश्वासविनाशिनी[२]
" 51 : After the first line, the following verse is found in Mss. 2 and 3 :—

जलपिप्पलिका हृद्या चक्षुष्या शुक्रला लघुः ।
संग्राहिणी हिमा रूक्षा रक्तपित्तज्वरापहा ॥[२, 3]
(रक्तदाहज्वरापहा[२])

The second line is 'अपक्वा विपरीता सा स्निग्धा वृष्या रसे कटुः' in Ms. 2 while it is absent in Ms. 3.

L. N. = Local Name.

Verse 52 : कासापहा मता[२]

" 53 : After verse 53, there is the following verse in Ms. 3 :—

स्वादुपाक्यार्द्रमरिचं गुरुश्लेष्मप्रसेकि च ।
कट्टष्णं लघु चक्षुष्यमवृष्यं कफवातजित् ॥

In Ms. 2 it is as :—

आर्द्रं तु मरिचं ज्ञेयं विपाके मधुरं तथा ।
कफसेककरं चापि रसे च कटुकं गुरु ॥

" 54 : बह्वभिष्यन्दिनी ज्ञेया[२], तद्वन्निः स्यन्दना ज्ञेया[३]
L. N. चाबो[२]

" 55 : पीनसांश्च व्यपोहति[२]

" 56 : Absent in Mss. 2 and 3

" 59 : कण्डूश्लेष्मानिलहरं[२, ३]

" 61 : दीपनी कोष्ठशूलनुत्[३]
After the first half of the verse the line is found in Ms. 3 :—'यवानी पित्तला कुष्ठक्रिमिवातकफापहा'
L. N. सोंधतृण[२]

" 62 : L. N. द्वितीय जवाइन[२]
After the first line there is description of छिक्किका in Mss. as—'छिक्किका पित्तला कुष्ठक्रिमिवातकफापहा'

" 63 : चक्षुषोर्हिमम्[३]
भंगा कफहरा तिक्ता[२], भंगा कफहरी तिक्ता[३]
After the first line of the verse, the following verse s are found in Ms. 2 :—

आर्द्रा कुस्तुम्बुरी कुर्यात् स्वादुसौगंध्यहृद्यताम् ।
सा शुष्का मधुरा पाके स्निग्धा तृड्दाहनाशिनी ॥
दोषघ्नी कटुका किंचित् तिक्ता स्रोतोविशोधनी ॥ धाना ॥

" 64 : मदकृद्वाग्निवर्धनी[३]
The second line is absent in Ms. 3.

" 65 : मुखसौगंध्यकारकः[२]; L. N. एकांगी, रामतुलसीति लोके[२]

" 66 : सुरसा……नाशिनी[२]
तुंबुरु……नाशनः[३]

" 69 : कट्वंगो ग्राहिदीपनः ॥ श्योनाक ॥[२]
कट्वंगा ग्राहिदीपनी[३]
कषाया मधुरा तिक्ता काश्मरी च कफापहा[३]
कषायतिक्तमधुरा काश्मरी च कफापहा[२]

६ मा०

Verse 70 : वृष्यं वातरुजापहम्[2]

After this verse there are the following verses in Ms. 2 :—

तस्मादुष्णातरं रक्तं विशेषात् पित्तकोपनम् ।
तद्बीजं रेचनं सोष्णं गृध्रसीं हन्ति दारुणाम् ॥
वातरक्तामवातघ्नं विशेषात् पवनापहम् ।

" 72 : L. N. for बृहती–'भरेहंटा'

